तोदात्तत्वं स्यादिति दूषणमाहुः अन्ये तु नैतद्युक्तं शब्दस्य भाषायां चोदितार्थत्वात् छन्दसि च व्युत्पत्ते
णच्छन्दसि इति पदिकमात्रापदस्य प्रत्ययविधायकेनास्य बाधात् यत्प्रत्ययसिद्धेरित्याहुः तच्चिन्त्यं तत्र च
छन्दसि चेत्यत्रापि पदस्य वविधानाभ्युपगमात् तथैव प्रमादादीयाख्यानत्वात् एतेनैतेरपि तच्चमाह्लक मु
ग्रु॰ स्याप्यत एव विधेयत्वादिति पुरा तस्मादुभयथाप्याख्या द्रात्रा उपपत्तेरेव बहुषु पाठेनवाख्यत्वात् छन्दसि च
प्रातिपदिकमात्रात् यत् तदर्हतीत्यर्थे गेदत्वाद्रीद्यः कृप्याः पलाशाः मादन्य मदन शाह स्यात्यप्यापि हश्य
त इति दीर्घः हदिविधिभ्यां छिश्चेति विद्वदर्थप्रत्ययः ॥ पात्राद्घंश्च चायत् पात्रमर्हतीति पात्रियः पात्र्यः कडङ्कर
दक्षिणाच्छ च ॥ समाहारे द्वन्द्वः चायत् कडंकरोतीति कडंकरः कडङ्गरं भुसादेव निपातनात् सिद्धान्त उँ एवड्॰
म् कडङ्करमाषमुद्गादिकाष्ठमर्हतीति कडङ्करीयो गौः कडङ्कर्यः कडङ्करो बुसं क्लीबमित्यमरः कडङ्गरीति

गकारपाठो निर्मूलः देवदत्तमाथवादिविरोधात् नीवारपाकादिकं करीयेति कालिदासः दक्षिणी
यश्च पगम्यपंक्तिश्चाश्च इति माघः दक्षिणीयो दक्षिणामर्हतीत्यत्र दक्षिणाया इत्यपीत्यभवः स्थालीविलात् स्वघनो
नः स्थालीविलमर्हतीति स्थालीविलीयास्तण्डुलाः स्थालीविल्याः पाकयोग्या इत्यर्थः॥ यज्ञर्त्विग्भ्यां॥
घखञौ॥ कर्मणस्तु यज्ञमर्हतीति यज्ञियः यज्ञाधिकारी सर्वार्थीसमर्थो विद्वान् शास्त्रेण पर्युदास्तश्च ऋ
त्विजमर्हतीत्यार्त्विजीनो यजमानः यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानं यज्ञकर्मार्हतीति यज्ञियो हे॰
देशः यज्ञानुष्ठानयोग्यत्वात् ऋत्विक्कर्मार्हतीत्यार्त्विजीनं ब्राह्मणकुलं देशस्य यज्ञाधिकाराभावा
दश्रमाभावात् भः नन्नु स्मृतेंगादिमदानोऽतद्धाट नेवं वयज्ञशब्दस्य वृत्तिविशेषेण तत्कर्मपरत्वात्सिद्धिः नत्र
शब्दार्थान्वयस्यनिषिद्धत्वात् प्रवृत्तशब्दैरर्थपरत्वसंभवे गौणार्थग्रहणाभावात् ब्राह्मीयाभ्यादश
रुणादयो वक्तव्याः॥ पारायणतुरायणचान्द्रायणं वर्तयति॥ अतः परं ठञेव बोध्यः अविच्छेदेनाध्ययनं वेदाध्य
यनं पारायणं तद्वर्तयति पारायणिकश्छात्रः तुरायणं यज्ञविशेषस्तं वर्तयति तौरायणिको यजमा
नः चान्द्रायणिकः नत्वत्र अन्यतराभावे क्रियानिष्पत्तेरभावाद्रूढिशीघ्रयोः पारायणानिवर्तकत्वे इव्य
त्यागवरुणोरप्यभानिर्वापकत्वेऽस्य याज्यायाजकयोर्यत्तनिवर्तकत्वमिति उपाध्यायस्तु त्विन्नोरपिस्व
त्ययः स्यात् मैवं तत्रानभिधानादिति भाष्यम्॥ संशयमापन्नः॥ प्राप्तन्नि त्रिविधयज्ञा संवधावृच्छिन्नानतस्मा
न॰ मवाया वच्छिन्ना तेन सन्देहात्मप्रत्ययेदेवदत्तादौ प्रत्ययः विषयत्वेनप्रकारतारूपेन तद्विशेष्यतारूप
तेन पर्वतो वह्निमानित्यादौ वह्नौ त्वात्वादावेव प्रत्ययो न तु पर्वतादौ अतएव प्रामाण्यसंशयो न गृहीत
क्षा॰ तेसांशयिकत्वादिति प्रयोगः इदन्ताने ग्रमानं वेत्यादौ प्रामाण्यस्य प्रकारत्वात् देवदत्तादेस्तु संश
यकोटित्वमपत्येव सांशयिकः संशयापन्नमानसः इत्यत्र मनस्यपि संशयापन्नमानसत्वयोगेति संशय

क्रोशशतं गच्छति क्रोशशतिकः योजनशतिकः
ततोऽभिगमनमर्हतीति च वक्तव्यम्

पं. कौटिल्यमेवार्थः॥ योजनं गच्छति॥ यौजनिकः क्रोशशतयोजनशतयोरुपसंख्यानं॥ क्रोशशतादभिग
सि.ख: मनमर्हतीति क्रोशशतिको भिक्षुः यौजनशतिको गुरुः दूरादप्यस्मै रुपसवर्णीय इत्यर्थः॥ पथः ष्कन्॥
कन्॥ पन्थानं गच्छति पथिकः स्त्रीत्वात् ङीष् पथिकी॥ पन्थो ण नित्यं॥ प्रत्ययसन्नियोगेन पथः पन्थादेश ः पः
१५ पन्थानं नित्यं गच्छति पान्थः अनुवर्तनात् ङीष् पान्थी नित्यग्रहणं प्रत्ययार्थविशेषणं न त्वेकदाचित्कत्व
त्यपि पथ्यपदप्रयोगात् नापि विग्रहनित्यत्वार्थं नस्पष्टत्वादिति भाष्यम्॥ उत्तरपथेनाहृतं च॥ औत्तरपाथि
के चकारोऽर्थसमुच्चयार्थः प्रत्ययार्थसमभिव्याहारात् उत्तरपथेन गच्छत्यौत्तरपथिकः [illegible] वारिजं
गलस्थलकान्तारपूर्वादुपसंख्यानं अत्रापि द्वितीयैव समर्थविभक्तिः आक्रान्तमेव उपप्रत्ययस्य थि
इष्टत्वात् द्वितीयान्तात्प्रत्ययस्वीकारेण नाक्रान्तादपिप्रसंगादिति कैय्यटः वारिपथेनाहृतं वारिप
थिकं जाङ्गलपथिकं स्थालपथिकं कान्तारपथिकं एवं तेन गच्छतीत्यर्थे वा ॥ अजपथशङ्कुपथा
भ्यां चेति वक्तव्यं आजपथिकं शाङ्कुपथिकं मधुकमरिचयोरणस्थलाद्वक्तव्यः स्थालपथं मधुक
मरिचं च अत्र मधुकमरिचयोर्गच्छतीति प्रत्ययार्थानन्वयादाहृतार्थ एव प्रत्यय इति केचित् गौणगम
नमाश्रित्य गच्छतीत्यर्थेपीत्यन्ये इति कैयटः॥ कालात्॥ वत्सादिभ्योऽणित्यतः प्राग्यमधिकारः कालेति
ट विशेषाणां ग्रहणं न स्वरूपस्य तमधीष्ट इत्यत्र कालविशेषनिबन्धनाया अन्यतः संयोगे द्वितीयाया निर्देशा
ल त् मासादित्यादेः कालस्य मासादिविशेषणत्वाच्च॥ तेन निर्वृत्तं॥ अह्ना निर्वृत्तमाह्निकं तेनेति कर्तृकरणे तृतीया
अन्तर्भावितण्यर्थाद्धेतोः कर्मणि क्तः॥ तमधीष्टो भृतो भूतो भावी॥ अधीष्टः सत्कृत्य नियुक्तः भृतो वेतनेन क्री
तः भूतः तावत्कालव्यापी भावी विद्यमानप्रागभावप्रतियोगित्वे सति व्यापी मासमधीष्टो मासिकोऽध्याप ॐ
कः मासं भृतो मासिको भृत्यः मासं भूतो मासिको व्याधिः मासं भावी मासिक उत्सवः नन्वधीष्टभृतयोः अन्य १५

यात्रुपपत्तिः अध्येषणाभरणयोर्मासव्यापकत्वाभावात् मैवं नात्यर्थ्यचेत्यर्थेनात्यन्तयस्य विधेयत्वात्
तदंशासिद्धं तदर्थानिर्देशादिति तथाच मासपदेनव्यापकव्यापारपरं मासव्यापकाध्यापनादिव्यापार
र्थमधीष्ट इत्यादिरर्थः भाष्यकृतस्तु अधीष्टभृतयोर्मासादिषाह्या अध्येषणादिव्याप्यमुहूर्तादिपराएवरटेत्य
ते भूतभविनोस्तुमुख्योर्थपराएव लत्याद्यसाविन्वाह्लतणास्येत्याहुः मासाहयसिथतवजो॥ मासंभूतोमास्यः
मासीनः त्रिंशत्स्वरार्थेपुंवद्भावनिषेधार्थंच मासीनाभार्या॥ द्विगोर्यप॥ द्वौमासौभूतोद्विमास्यः पञ्चदशमास्यः
तद्धितार्थेतिसमासः यप्वचनेरपवादोयञ्प्राग्वतेः संख्यापूर्वपदानांतदंतविधिरितिसिद्धान्तात्सर्वत्रैणतस्या।
म्रःपित्वमनुदात्तत्वंतेनद्रयंतकालेतिपूर्वपदप्रकृतिस्वरंत पूर्त्यकेतप्रत्ययस्वरस्यमतिर्हष्टत्वात् द्विमासया
द्वौतौदात्तःस्यात्॥ षण्मासाण्यच॥ यपोऽप्यनुवृत्तिःर्यथौलोनात् चाष्टज् षाण्मास्यः षण्मास्यः षाण्मासिकः योगद्व
यमिदंवयोविषयं अतएवचभृतइत्येवार्थंउक्तोनत्वधीष्टादयः मासमधीष्टोभृतः भावीत्य नवयोविशेषा
नवबोधात्॥ अवयसिठंश्च॥ षाण्मासिकोऽवधिः चात् ण्यत् षाण्मास्यः॥ समायाःखः समांवर्षमधीष्टोभृतो
भूतोभावीवासमीनः॥ द्विगोर्वा॥ समांतात्द्विगोर्वाखः तेनपरिजय्येत्यतःप्राक्निर्दिष्टादयःपंचप्रत्ययार्थाःद्विस
मीनः द्विसमीना पक्षेठञ् द्वैसमिकः॥ रात्र्यहःसंवत्सराच्च॥ एतदंतात्द्विगोःखोवा पक्षेठञ् द्विरात्रीणः द्वैरात्रिकः
द्व्यहीनः द्वैयह्निकः॥ द्विसंवत्सरीणः द्विसांवत्सरिकः संख्यायाः संवत्सरसंख्यस्यचेत्युत्तरपदवृद्धिः नद्वैया
ह्निकइत्यत्र अह्नादेशावाधित्वापरत्वाद्वच्चस्यात् नचद्वैयाह्निकइत्यत्रतथापिसिद्धेरिष्टापत्तिः द्व्यहीनइत्य
त्रासिद्धेःअह्नादेशोह्नहीनइत्यस्यप्रसंगात् नचमहाविभाषयातद्विकल्पः द्व्यहीनाद्यन्ताःसमासांताश्चेति
नित्यवृत्तौपठितत्वान्नत्वात् मैवं समासांतविधेरनित्यत्वात्॥ वर्षाल्लुक्च॥ वर्षशब्दांतात् द्विगोर्वाखः पक्षेठञ्
तस्यचवालुक् द्विवर्षीणोव्याधिः द्विवार्षिकः वर्षस्याभविष्यतीत्युत्तरपदवृद्धिः भविष्यतीतिद्वैवर्षिकः ल

पं.
२५ सिन्त्र.

किंद्विवर्षः॥ चित्तवति नित्यं॥ वर्षान्तात् द्विगोः उक्तप्रत्ययस्य नित्यं लुक् चेतने प्रत्ययार्थे द्विवर्षो बालः अतएव श्चे
अव्याधिर्वि...चेतनप्रत्ययार्थलाभायोक्तं षष्टिको व्रीहिः षष्टिकाः षष्टिरात्रेण पच्यन्ते तृतीयान्तात्कन् रात्र
शब्दलोपश्चात्र निपात्यः बहुवचनमतन्त्रं षष्टिको व्रीहिः नन्वयोगस्य मुद्गेष्वतिप्रसङ्गः क्त्वा संज्ञायामित्यपि व
क्तव्यमिति चेत्सत्यं अनभिधानादेव तद्धावृत्तादिति भाष्यं॥ वत्सरान्तात् छश्छन्दसि॥ इद्वत्सरीयः॥ संपरिपूर्वात्ख च॥
चाच्छः संवत्सरीणः संवत्सरीयः परिवत्सरीणः परिवत्सरीयः॥ तेन परिजय्यलभ्यकार्यसुकरं॥ मासेन परिजेतुं
शक्यो मासिको व्याधिः मासेन लभ्यकार्यसुकरं वा मासिकं॥ तदस्य ब्रह्मचर्यं॥ अनेन संयोगाद्द्वितीयान्तात्का
लवचनादस्येत्यर्थे प्रत्ययः मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी यद्वा प्रथमान्तादस्येत्यर्थे मासोऽस्य मा
सिकं ब्रह्मचर्यं आद्यमासावच्छिन्नब्रह्मचर्याश्रय इत्यर्थः द्वितीये मासावच्छिन्नब्रह्मचर्यमिति विशेषः आद्य
मासस्यावच्छिन्नत्वसंबन्धेन प्रत्ययार्थे ब्रह्मचर्ये तस्य प्राथम्येन व्रतचारिण्यन्वयः नन्वेवं मासावच्छिन्नब्रह्म
चर्यवानिति केयोरक्तं दर्शं वाऽन्तरं वा निति वन्निराकांक्ष इति चेत्सत्यं अवच्छिन्नत्वमेव प्रत्ययार्थः तस्य ब्रह्मचा
रीत्येकदेशो ब्रह्मचर्यमित्यत्र पदार्थभूते ब्रह्मचर्येऽन्वय इति बोध्यं। महानाम्न्यादिभ्य उपसंख्यानं। ब्रह्मचर्य
स्य प्रत्ययार्थत्वात्सामर्थ्यलभ्या षष्ठीसमर्थविभक्तिरिति कैयटः महानाम्नीनां ऋचां ब्रह्मचर्यमस्य माहानाम्नि
क आदित्यव्रतिक विदामघवन्नित्याद्या ऋचो महानाम्न्यः सूत्रत्वेन भाषितपुंस्कत्वाभावान्न पुंवद्भावः हरद
त्तस्तु भस्याढे इति पुंवद्भावान्माहानामिकमित्याह यौगिकपदाश्रयमिति तदभिप्रायः तदुपेक्ष्यं भाष्यविरो
धात् तद्व्रतीति चोपसंख्यानं। महानाम्नीव्रतिमाहानाम्निकः आदित्यव्रतिकः न च चरणाम उष्ठानं तत्स्व
ऋचामनुपपन्नमिति वाच्यं महानाम्नीशब्दस्य लिंगसंबन्धेऽजहत्त्वमेव तत्सहचरितव्रते लाक्षणिकत्वात् अ
वान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः अवान्तरदीक्षी तिलव्रती यद्यप्यत्र यस्येति लोपेन सिद्धं तथाप्युत्तरार्थं डिनि

१९

अष्टाचत्वारिंशतो डुन् डिनिश्च वक्तव्यः । इत्यावष्टाचत्वारिंशल्लक्षस्य वर्षाणां संख्येयत्वप्रत्ययः प्रतिवेदं
द्वादशवर्षाणि व्रतचर्याम् अष्टाचत्वारिंशतं वर्षाणि व्रतं चरति अष्टाचत्वारिंशकः अष्टाचत्वारिंशी अष्टचत्वा
रिंशल्लोहेत्तनभवति कृतान्त्वनिर्देशात् । चातुर्मास्यानां यलोपश्च वक्तव्यः चकारः प्रत्ययद्वयसमुच्चयार्थः चातु
र्मासिकः चातुर्मासी । चतुर्मासात्तत्र भवे यज्ञे ण्यो वक्तव्यः । चतुर्षु चतुर्षु मासेषु भवन्ति चातुर्मास्यानि यज्ञाः वै
श्वदेववरुणप्रघासाः शुनासीरीयसाकमेधे चेति पर्वचतुष्टयसंज्ञा । संज्ञायामण् वक्तव्यः । चातुर्मासी पौर्णमासी
न चात्र तत्र भव इत्येव सिद्धिः तस्य प्राग्दीव्यतीयत्वात् द्विगोर्लुगनपत्ये इति लुक्प्रसंगात् न च प्रथमवार्तिके
तत्र भव इत्यत्रैवार्थे ऽपवादित्वेन लुकः प्रसक्त्यभावादिति वाच्यं अत्र चतुर्मासशब्दात्तद्धितार्थे मत्रैव तस्य विहि
त्वात् कालाट्ठञस्तु न प्राप्तिः समुदायस्याकालवाचित्वात् तदन्तविध्यभावाच्च केचित्तु यथा कथंचित्कालत्व
मेष्टव्य इत्युक्त्वा कालादिति ठञि तस्य च लुकि प्राप्ते इदमण्विधानमित्याहुः इति कैयटः ॥ तस्य च दक्षिणा य
ज्ञाख्येभ्यः ॥ यद्यपि बहुवचननिर्देशादेव स्वरूपग्रहणनिरासस्तथाप्याख्याग्रहणं प्रसिद्धाः प्रसिद्धयज्ञपरि
ग्रहार्थं अन्यथा आग्निष्टोमिकः राजसूयिकः वाजपेयिकः पाकयज्ञिक इत्यादावेव स्यात् न तु पांचौदनिकः
दाशौदनिक इत्यादौ ॥ तत्र च दीयते कार्यं भववत् ॥ दीयते कार्यमित्येतयोरर्थयोः कालवाचिभ्यो भववत्प्रत्यया
स्युः तेन तत्र भव इत्यधिकारविहिताः प्रत्यया बोध्याः मासे दीयते कार्यं वा मासिकं एवं प्रावृषेण्यः प्रावृषे
ण्यः शारदं सांधिवेलम् ऋतुनक्षत्रेभ्य इत्यण् नन्वमासे यद्दीयते तत्र कार्यं वा मासे भवं भवत्येव तथा च तत्र भव इ
त्युपदेशादेव सिद्धावतिदेशो वैयर्थ्यं न चोपपदविभक्तेः कारकविभक्तिर्बलवती तत्रेत्यधिकरणसप्तमी इह
त्वतिदेशसामर्थ्याज्ज्ञाप्यलक्षणा तथा च मासेन गते यद्दीयते तदर्थमतिदेश इति वाच्यं औपश्लेषिकाधिकरणस्य
तत्र ग्राह्यत्वात् मासेन गते यस्य मासस्य औपश्लेषिकमधिकरणं भवत्येवेति तत्र भव इत्यनेनैव सिद्धेः कारकप्रकरणे

५
प्रि.स

वैगेणास्यापिसंज्ञेतिनिषिद्धान्नात् अत्रभाष्यम् तत्यवदतिनिणायस्त्राख्येभ्यः तत्रचदीयते सप्तम्यन्तेभ्यो यस्त्राख्येभ्यो
दीयतइत्यर्थेऽस्मात् तथाचदीयतइत्यस्यप्रत्ययविध्यर्थमुपादानं तत्वत्तिदेश्यार्थं तेनाग्निष्टोमेदीयते आग्नि
ष्टोमिकंभक्तमित्यादिसिद्धं यत्तुदीयमानस्यभवत्वात्तुतयतेभ्यश्चेतिठञ्सिद्धइति तन्न तत्रव्याख्यानव्यनाप्त
इत्युक्तत्वे द्वयोर्वाजिपेययोर्दीयतेद्वैवाजपेयिकमित्यत्रापिठक्योगविभागात्ठञ् प्राग्वतेःसंख्यापूर्वपदानां
तदन्तविधेस्तत्कृत्वादितिकैयटः कार्यग्रहणंतुवार्तिककृताप्रत्याख्यातम् ॥ कालाधिकारःसमाप्तः ॥ व्युष्टादिभ्यो
ऽण् ॥ व्युष्टेदीयतेकार्यंवावैयुष्टं व्युष्टनित्यनिःक्रमणप्रवेशनतीर्थसंग्रामसंघात अग्निपदपीलमूल प्रणप्रक
रणेऽग्निपदादिभ्यउपसंख्यानंव्युष्टादिभ्योऽण् ऋतोरण् विषुवाद्वोपाधाद्वाऽण् इतिस्थलत्रयमाधारणमेतदुपसं
ख्यानमितिभाष्यं अग्निपदेदीयतेकार्यंवा आग्निपदं पैलमूलं आदिशब्दःप्रकारे क्वचिदर्थेऽनन्त्रिदण् अनु
पदर्शनमात्रकृतंचसाहचर्यमितिकैयटः इतव्ययान्यस्यानमुदाहरिष्यामः ॥ तेनयथाकथाचहस्ताभ्यांणयतौ ॥
यथाकथाचेत्यव्ययसंघातोऽनादरार्थः तस्मादव्ययानिप्रातिपदिकत्वाभावेऽपिवचनसामर्थ्यात्प्रत्ययः यथाकथा
चदीयतेकार्यंवायाथाकथाचं अनादरेणदेयंकार्यंचेत्यर्थः हस्तेनदीयतेकार्यंवाहस्त्यम् अर्थयोर्नयथासं
ख्यंव्याख्यानात् ॥ संपादिनिगुणोत्कर्षःसंपत्तिः ॥ आवश्यकत्वादित्यर्थः तेनेत्युक्तवृत्तिः कर्णवेष्टकाभ्यांसंपादिक
र्णवैष्टिकिकंमुखं कर्णालंकारजन्यशोभान्यताभावादनधिकरणमित्यर्थः ॥ कर्मवेषाद्यत् ॥ कर्मणासंपादिक
र्मण्यंशरीरं यज्ञाभावकर्मणोरितिप्रकृतिभावः वेषःकृत्रिमआकारःतेनसंपादीवेष्योनटः ॥ तस्मैप्रभवति ।
संतापादिभ्यः तस्माइत्येकवचनंसंतापादिभ्यइत्येकाभिप्रायं चतुर्थ्यन्तेभ्यःसंतापादिभ्यः प्रभवतीत्यर्थेठञ् अल
मर्थेवर्तते यो संतापायप्रभवतिसांतापिकोग्रीष्मः संतापसंनाह संग्रामसंयोगसंपरायसर्वेष निःपेषनिसर्गउपसर्गप्रवा
सउपवाससंघात मांसौदनसक्त मांसौदनेतिसंघातविग्रहीतोपादानं ॥ योगाद्यच्च ॥ चात्ठञ् योगायप्रभवतियो-

गे.
१२

गयः यौगिकः ॥ कर्मण उकञ् । कर्मणो प्रभवति कार्मुकं । नस्तद्धिते इति टिलोपः ॥ समयस्तदस्य प्राप्तं ॥ समयः प्रा स्तृ १
प्तोस्य सामयिकं तत्कालानुरूपमित्यर्थः प्राप्तशब्दस्य योग्यपार्थत्वात् उद्भावनानर्हकालोद्भाव्यमाने वाक्ये प्रयाप्त
कालत्वमिति तार्किकव्यवहारात् ॥ ऋतोरण् ॥ ऋतुः प्राप्तोस्य आर्तवं पुष्पादि ॥ उपव[स्तृ]प्राशितृभ्यो वाच्यः ॥ उपवस्ता प्राप्तो
स्य औपवस्त्रं प्राशिता प्राप्तोस्य प्राशित्रं ॥ छन्दसि घस् ॥ ऋतुः प्राप्तोस्य ऋत्वियः सित्त्वं पदसंज्ञार्थं तेन भसंज्ञाविरहाद्
गुणो न इकोसवर्णे इति शाकलप्रकृतिभावविकल्पस्तत्वं इति हृत्सानुविधानान्यवितव्यार्थः सिन्नित्यसमासयोस्त
न्निषेधस्य वार्त्तिककृतारंभात् ॥ कालाद्यत् ॥ कालः प्राप्तोस्य काल्यं शीतं ॥ प्रकृष्टे ठञ् ॥ प्रकर्षहेतोः प्रथमान्तात्कालश
ब्दात् षष्ठ्यर्थे ठञ् प्रकृष्टः कालोस्य कालिकं वैरं दीर्घकालावच्छिन्नमित्यर्थः प्रकृष्ट इति कर्मणि क्तः ठञधिकारे
पि पदस्तु पुनर्ग्रहणं कालनिरासार्थं ठञुपादानम् ॥ प्रयोजनं ॥ तदस्येत्येव इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकं प्रयोजनं फले
कारणं वा ॥ विशाखाषाढादण् मन्थदण्डयोः ॥ वाच्ययोर्यथासंख्यं विशाखा प्रयोजनमस्य वैशाखो मन्थः आषाढो द
ण्डः ॥ चूडादिरुपसंख्यानं चूडा श्रद्धा च प्रयोजनमस्य चौडं श्राद्धम् ॥ अनुप्रवचनादिभ्यश्छः ॥ अनुप्रवचने ब्रह्मौदनं प्रयोज
नमस्य अनुप्रवचनीयं विशिशूरिपदिरुहिप्रकृतेरनात्सपूर्वपदादुपसंख्यानं अनस्य युप्रत्ययादेशस्य केवलस्य
पूर्वपदसंबंधानर्हत्वान्नंदनोपादानं गेहानुप्रवेशनं प्रयोजनमस्य गेहानुप्रवेशनीयं प्रपाश्वणीयं गोप
दनीयं प्रासादारोहणीयं ॥ स्वर्गादिभ्यो यद्वक्तव्यः ॥ स्वर्गः प्रयोजनमस्य स्वर्ग्यं धन्यं यशस्यं आयुष्यं प्रयोजनमि
ति प्राप्तस्य ठञोपवादः ॥ पुण्याहवाचनादिभ्यो लुग्वक्तव्यः ॥ पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनं शान्तिवा
चनं स्वस्तिवाचनं साहचर्यादभिधाने सिद्धे भेदविवक्षायां प्रत्ययश्रवणनिवृत्त्यर्थं लुग्विधानं ॥ समापनात्सपू
र्वपदात् ॥ छंदः समापनं प्रयोजनमस्य छन्दस्समापनीयं पदग्रहणं व[illegible]सर्वनिरासार्थं ॥ ऐकागारिकट् चौरे ॥ टि
त्वं ङीबर्थं एकमसहायमगारं प्रयोजनमस्य ऐकागारिकश्चौरः जनवतो गृहस्य मो[...]नमस्य आकस्मात् भाष्यकृता

पि १

पं. स्त्वाहः प्रयोजनमित्येव वक्तव्यं सिद्धः नवयपकामेव भिन्नांस्त्रहणानि न द्वितीयान्तस्याभिन्नो रथ्यैकमणां दंप्रयोजनं
सि॰ म॰ भवतीति न ध्याह्रस्यर्थे निपातने इति वाच्यं एकागारादिन्द्वा इत्येव वाचित्वात् अनभिधानाभिन्नवारणाद्वेति न च
जित्त्वं निह्नस्यर्थे निपातनमिति वाच्यं स्वप्रत्याख्यानपर भाष्य वार्तिक प्रामाण्येन जित्त्वस्येष्टत्वादिति के
चित्॥ आकालिकडाद्यन्तवचने॥ समानकालशब्दस्य कालादेशः इकक्प्रत्ययो निपात्यते आद्यन्तवचने समान
कालावाद्यन्तौ यस्य स आकालिकः स्तनयित्नुः जन्मसमानकालविनाश इत्यर्थः वार्तिककारस्त्वाह आका॰
लान्निपातनानर्थक्यं ठञ्प्रकरणादिति अयमर्थः आकालादित्येव सूत्रणीये ठञः प्रकरणादेव लाभात् उक्त
निपातनं वैयर्थ्यात् आत्मनि कालो यस्य स आकालः कालस्य चात्मन्यसंभवात् उत्पत्तिकालेन समानो यस्य वि
नाशकाल इत्यर्थः नजातीयपदनाशाच्छ्रुन्ने रूपपत्तेः उत्पादविनाशकालस्य चाभेदानुपपत्त्या उत्पत्तिविनाशका
लयोः संनिकर्षपरत्वं निरन्तरकालयोर्भेदाग्रहे साम्यभेदव्यवहारादिति भाष्यकारास्तु आदिर्जन्म अन्तो विनाशः
तयोः समानकालत्वं ड्ये निपातः प्रत्यवहितकालत्वाद्यन्तयोरेककालत्वं निपातनाद्वाभिमतार्थप्रतीतिरित्येकेयं
विधौ तत्क्षेपः तदुक्तं धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च अनुबन्धविकाराणां रूढ्यर्थं च निपातनं केचित्तु
वर्षादिष्वाकालिकमाहुः यस्मिन्नब्दादिकाले येषामुत्पत्तिस्तस्मिन्नेव द्वितीयादिदिने संबन्धि निषेधाना
माकान्यासालिकानीत्याहुः इदं चैकेयटपदस्य स्पष्टं॥ आकालाट्ठंश्च वक्तव्यः॥ आकालिको नध्यायः आकाल
शब्दो वार्तिको क्रीत्याद्यर्थे ठः आकालिकी॥ स्वार्थे ठः चाहम्॥ आकालिकाविद्युत्॥ ठञ्प्रकरणं समाप्तः॥ ॥
तेन तुल्यं क्रिया चेद्वतिः॥ इह यत्तृतीयासमर्थं क्रिया चेत्सा भवतीति क्रियायाः प्रकृत्यर्थविशेषणत्वपक्षः यत्तु
ल्यं सा क्रिया चेदित्यर्थे प्रत्ययार्थविशेषणत्वपक्षः उभयत्राप्यनेन सूत्रक्रियात्वमर्थलभ्यं क्रियाभिन्ने क्रि॰ गं
यासा[illegible]म्याभावात् ब्राह्मणेन तुल्यं ब्राह्मणवदधीते इत्यत्र ब्राह्मणाद्यध्ययनेनाध्ययनेनाह्यानि किं शिष्टस्तीय १८

ख्यानव्याख्याने तत्राद्ये वाक्याध्याहारः कार्यः तेन क्रियापदयोर्भिन्नविभक्तिकत्वात् द्वितीयेन श्रौतमेव सामाना
धिकरण्यं तुल्यक्रियेण तयोरेकविभक्तिकत्वात् तुल्यमिति सामान्येन पुंस्त्वकमिति विशेषः यद्वा तेन तुल्य
मित्यर्थे वतिर्भवति क्रिया चेद्वाच्येत्यर्थः किंचात्र क्रियाया असत्त्वभूतायाः विहितस्य वतेरव्ययसत्त्वभूतार्थवचन
त्वादव्ययत्वसिद्धिः यत्नं त्वेति लिंगसंख्ययानन्वयान्न द्रव्यधर्मिति लक्षणयोगात् गणपाठस्य च प्रपंचार्थत्वा
त् क्रियाविशेषणमित्यप्यर्थं स्वातिङन्तप्रयोगः प्राग्यपेतत्वभूत्पूर्वं गतिराप्रयाणीयानवतत्पुत्रं गत्वं तदभाव
एवतदुल्लासात् यद्वा क्रियापदे लक्षणयातत्तुल्यं क्रियाद्वारकं च क्रियावतोः सादृश्यं तथा च ब्राह्मणेन तुल्यो
ध्येतेति क्रियावतोर्द्रव्यस्य प्रत्ययार्थत्वात् वतेस्त्वापि लिंगसंख्यायोगाद्व्ययसंज्ञार्थं वतेरव्ययेषु पाठस्मा
मर्थ्यादव्ययसंज्ञेति वक्तव्यमिति निगौरवम् यदंतो वक्ति मात्यभविनमर्हतीति क्रियापदप्रयोगो महान् सुवा
दिति वतेः साधुत्वार्थः तदभावेप्यौत्सर्गिकात्ति क्रियया साधुत्वबोध्यं उत्तरसूत्रविहितस्यापि वतेर्विवार्थेषु
त्वेनैरसत्त्वभूतार्थाभिधायित्वं तदर्हमित्यनेनापि क्रियायामेव तद्धितान्तमिति तदर्थोपि वतेः पाठेन कार्य
इति सिद्धं ॥ तत्र तस्येव ॥ क्रियेति निवृत्तं द्रव्यगुणादिप्रयुक्तसादृश्यपार्थमारंभः मथुरावत्स्रुघ्ने प्राकारः चैत्रवन्मै
त्रस्य गावः मथुरायाः स्रुघ्ने प्राकारसादृश्याश्रयः स्रुघ्नस्थः प्राकारः चैत्रसंबंधिगवीसादृश्याश्रयो मैत्रसंबंधि
न्योगा वहति बोधः इह सादृश्यं वत्यर्थः मथुरायां स्थितस्य प्राकारेण स्रुघ्नस्थितयोगित्वेन वत्यर्थे तस्याश्रयत्वसंबं
धेन प्राकारेऽन्वयः प्राकारस्याभयथान्वयो युत्पन्नैर्वैविध्यात् एवमुत्तरत्रयोज्यम् यद्वा स्रुघ्नस्थप्राकारवृत्त्यस
समप्यर्थः तयोः परस्परान्वयः सप्तमीलोपत्वान्न विकल्पानां बोधाभावात् स्यादेतत् मथुरायामिव पाटलिपु
त्रे प्राकारः मथुरायास्तुल्यवेत्यनयोस्तुल्यार्थत्वात् तृतीयांतादेव सर्वसंबंधेनावतिरस्तु क्रियाग्रहणं च माकु
र्वत्सत्वे सादृश्यप्रकारकप्राश्रयत्वसंसर्गको बोधः तुल्यप्रयोगे तु सादृश्यप्रकारकोऽभेदसंसर्गक इति वि

पं शेषस्य प्रयोजकत्वात् न च प्राकारेण मथुरायाः सादृश्यानुपपत्तिः मथुरापदस्य मथुराप्राकारपरत्वात् एवं देवदत्त
सि·त्र· स्येव यज्ञदत्तस्य शुक्ला दन्ता देवदत्तेन तुल्या यज्ञदत्तस्य शुक्ला दन्ता इत्यत्रापि बोध्यम् एवं च क्रियाग्र
हणस्य द्रव्यगुणग्रहणस्य सादृश्ये प्रत्ययो माभूदित्येतदर्थमावश्यकत्वात् नत्वग्रहणस्य सादृश्ये वत्यर्थं सन्नम्य ।
नात्मस्यैतावता प्रत्ययविधानार्थमेतदारंभात् तुल्यशब्दस्य वाचकत्वात्तद्योगे तृतीयोपपत्तावपि इवादेर्द्योत
कत्वात्तदनुपपत्तेः वाचकत्वे निपातार्थे देवदत्तादेर्नामार्थस्य प्रतियोगित्वादिसंबंधेनान्वयसंभवात्तृतीया
या अनोपत्तितत्वात् नन्विवेवेत्येवमस्तु ग्राणीये तेनेत्यस्यानुवृत्त्या तेषां षष्ठीविषये वद्यात् प्रयोगसत्त्वाविभक्त्यो
रुमार्थस्येति चेन्न इवशब्दस्यासत्त्वार्थकतया तद्योगे तृतीयाया लक्षणेनानेनाविहितत्वात् अनिष्टत्वेन २
ज्ञापनानर्हत्वाच्च न च समासमध्यपि क्वचिन्न विहितेति वाच्यं तस्याः समर्थविभक्तित्वेन निर्देशबलादेवानुमानात्
अन्यथा तेनेत्यनुवृत्तेः सामर्थ्यात् तृतीयानुमानेनैतत्र तस्यैव वैयर्थ्यात् तेन देवैस्तुल्यं नामस्त्यालोऽतोषिवन्नामेत्या
द्विसिद्धं देवानामिवेत्यादिरर्थः स्यादेतत् मथुरावत्पाटलिपुत्रे प्राकारइत्यादौ अधिकरणसप्तम्यन्ताद्वति
प्रत्ययविधानार्थमेव तत्रग्रहणमस्तु ज्ञापकाच्च षष्ठीविषये सप्तम्यनुमानेऽधिकरणसप्तम्यन्ताद्वतेरसिद्धेः
न तदर्थं ज्ञापकत्वमपीति चेत् अत्रैके यदः तेषामृत्रहृयमुत्राविति निभाष्याभिप्रायः तेनैकेन यथाविहि
तसप्तमीषष्ठ्यन्ताद्वतिविधाने द्वितीयेन त्विवशब्दयोगे षष्ठीसप्तम्यनुमाने तस्याश्च षष्ठीवाधो माभूदिति त
स्येत्यनेन न षष्ठीप्रतिप्रसूयते महाविभाषया वा षष्ठ्याप्रवाधः एवं च षष्ठ्यंशेऽनेनास्य पृथक्सामर्थ्यमिति केचिदाभि
प्रायः ॥ तदर्हं ॥ अर्हतीत्यर्हः पचादित्वादच् तद्योगे कर्मणि षष्ठी प्राप्नोति श्रोतव्यत्वात् द्वितीयेति केचित् तद्योगषष्ठ्या
अनित्यत्वे लिङ्गमेतत् तेन दशरथेरामोदधानं मे इति भट्टिप्रयोगः संगच्छते इत्यन्ये यथैरामोऽरमिति पाठ एषो
नयमंगलादिविरोधात् इत्याहुः न तु क्रियेति नानुवर्त्तते तेन द्वितीयान्ताद्दर्हणस्य कर्तृभूताया ।

क्रियायावतिरित्यर्थः तेनराज्ञानमर्हतीत्युक्तमित्यादौन प्रत्ययः तथाचराज्ञानमर्हतीत्युक्ते राजवद्वर्त्तते
२ ब्राह्मणमर्हतीत्युक्ते ब्राह्मणवद्वर्त्तत इत्यत्रापि राज्ञा तुल्यं वर्त्तन इति तेन तुल्यमित्येव सिद्धम् राजवद्वृत्तमस्ये
त्यादावपि तत्र तस्येवेत्यनेन सिद्धं नच राजवद्वर्त्तते राजेत्यत्राऽभेदे सादृश्याभावादप्राप्तम्भवति विध्यर्थ
मेतदिति वाच्यम् तत्रापि राजपदस्य प्रसिद्धराजभरतभगीरथादिपरत्वात् राजवद्वर्त्तते दशरथ इत्यादौ
सादृश्याभावाद्धेतुप्रवृत्तेः विच्छेदकृतं हस्तवदित्यत्र कृतं हस्तमर्हतीति विच्छेदनं त्यर्हणस्यैव बोधो न सादृ
श्यस्य अत्र भाष्ये द्वितीयान्तवाच्यस्यार्थस्याऽर्हायाः क्रिया तस्याः क्रियायाश्चेयं सूत्रमात्रे दृष्टं विधानं यदि किन्तिन्म्यः
न८ सिद्धमेव राज्ञोऽर्हमित्युक्तत्वप्रत्ययनिवृत्त्यर्थं चरूपादीयते राज्ञानमर्हतीत्युक्तेन त्वेराज्ञानमिति तदोक्तप्रयोगः अत
एव राज्ञेवार्थं पृच्छते वैयाकरण इवार्थं वैयाकरणेनोक्तेनेत्यादिप्रयोगः तथाचराजादेरुक्तरूपे यथाप्रयुक्ता
दिनत्वेनाक्रियत इत्यर्थः अवस्थाभेदादेकस्यैवोपमानोपमेयत्वविवक्षायां तेनास्य विषयकप्रयोगः
ततो यथा वहिर्हितास्त्वराये इत्यादौ तद्वृत्तिविषये यथा शाब्दोऽपि सन्नार्थः यथात्वेन यथात्वमित्यादि दर्शि
तान् षष्ठ्याभावेन योगस्तूपपन्नैः अतो द्वितीयान्तादर्हार्थे वतिः योग्यतामर्हतीति विधानमाख्यानेनेत्यर्थो
त्क्रियायोगोपपत्तिरित्याहुः एतेन यथावदस्मै पुरुषोऽन्नमायतामित्यादिकमपि व्याख्यातं॥ उपसर्गाच्छ
न्दसि धात्वर्थे॥ धात्वर्थविशिष्टसाधनवृत्तेरुपसर्गात् स्वार्थे वतिः स्यात् छन्दसि सूत्रे धातुशब्दः क्रियापरः
सोर्थः प्रयोजनं यस्य साधनस्य तन्नास्मिन्निति व्याख्यानात् यदुद्वतो निवतः उद्गतान्निर्गतानीत्यर्थः साधन
स्य सत्वभूतत्वाल्लिंगसंख्यान्वयः प्रेषुत्वमत्रबोध्यादसं उद्गतानीति भाष्येनपुंसकतया व्याख्यानात् साधना
शाब्दोत्र शास्त्रार्थ इह त्वपरः शङ्केरसत्वभूतत्वादिति कैयटः स्त्रीपुंसाभ्यामितिकृपसंख्यानं अत्र यथाकाम
स्नोः प्रसंगादिति वार्त्तिकारंभः स्त्रीवत् पुंवत् स्त्रीपुंवच्चेति निर्देशो वत्यर्थे स्त्रीपुंसाभ्यामिति सूत्रेन प्र

पं. वर्त्तेत इत्यत्र ज्ञापकमिति भाष्ये ॥ तस्य भावस्त्वतलौ ॥ घटस्य भावो घटत्वं घटता । स्त्रीपुंसाभ्यां उपसंख्यानं
सि स्त्र. स्त्रीत्वं पुंस्त्वं अन्यथा प्राग्भवनादिति हि नैनञ्स्नञावेव स्यातां । वेति च वक्तव्यं । स्त्रैणं पौंस्नमिति भावे नञ्स्न
ञावपि यथा स्यातां अन्यथा भावमात्रविषयाभ्यां त्वतलाभ्यां अर्थतः सावकाशयोर्नञ्स्नञोर्बाधप्रसंगा
20 त् अपवादसमावेशार्था हि सिद्धे वाग्रहणं उक्तवचनप्रत्याख्यानार्थः यथा यमनिजादिभिः सह त्वतलोः समा
वेशः एवं नञ्स्नञ्भ्यामपीत्यर्थः नन्वा त्वतलावादिनि वचनादिमनिजादिभिः समावेशोपि नञ्स्नञ्भ्यां समावे
शोऽप्रमाणाभावः तयोरा च त्वादित्यधिकारात् पूर्वमपठितत्वात् न च प्राग्भवनादिति सूत्रमुपस्थानात् त्वतले
यवादेरिमनिजादिभिः समानदेशावेव नञ्स्नञौ अपवादानामपवादसमानदेशत्वादिति वाच्यं विधिव
धिकारः परिभाषा वेति त्रयं तत्र संभवति अन्यतमनिर्णयाभावात् तत्राधिकारपक्षे कार्यकालपरिभा
षेति पक्षे च प्रतिसूत्रमुपस्थितं वस्त्रीपुंसाभ्यामित्यस्योपस्थानान्नञ्स्नञोराभ्यां त्वतवे यद्विना प्राग्भवनाद्धेऽ
र्थेस्तानेपत्यनञ्स्नञौ नेन विधीयेते यथोद्देशं परिभाषेति पक्षो वा तदा तयोर्बहिर्भाव एव अतएवाणा
प॰ द्यर्थे विशेषलक्षणाद्गुणा वा बाधात् सर्वविप्रतिषिद्धमित्युक्तं प्राग्दीव्यत इत्यस्य विधित्वे यथोद्देशं परिभा
षेति पक्षे वा तदुपयोगात् किं च कार्यकालपक्षेऽपि भवनात्प्राक् नेष्यार्थे पुनः नञ्स्नञ्भ्यामुपस्थातव्यं यदि दि
भावस्त्वर्थे बोधे सत्येव तयोरुपस्थितिः तस्य भावस्त्वतलावित्स्त्रीपुंसाभ्यां भावे नञ्स्नञाविति तदा प्रदेशे उपस्थि
तयोस्तयोराचत्वादित्यस्मात्पूर्वत्वं अथापवादविधानविज्ञानेऽपि तयोरुपस्थितिस्तदा ब्रह्मणस्त्व इत्यस्मा
त्पूर्वं नञ्स्नञौ भवतः उभयथापि आ च त्वादित्येतत् स्वंतरत्वाभावात् गुणवचनब्राह्मणादिभ्य इत्यत्र तु प्रकृतिर
विशेषस्य साक्षादुपादानात् कर्मण्यपार्थस्य प्रकृत्यन्तरेण संबन्धात् नञ्स्नञोरुपस्थितेरेवाभावात् तस्मादपवा ग्रं. २.
दसमावेशादित्युपपन्नमिति चेन्न आ च त्वादित्यत्र चकारेण तत्समावेशस्य वक्ष्यमाणत्वात् स्यादेतत्

प्रवृत्तिनिमित्तविशेषानवच्छिन्नस्य भावशब्दस्योपादानादभिप्रायादिर्वाच्यत्वेपि त्वतलोरस्यान्ता येनाभा
वात्तेनाभावा इति भाष्यं भवतीति भावाः भवतेश्चेति वक्तव्यमिति कर्त्तरि णइति कैयटः अत्र वार्त्तिकं सिद्धं तु
यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति गुणपदं भेदकभूतजात्यादिपरं अत्र गुण
स्य भावाच्चैत्रादौ पितृशब्दप्रयोगाच्चैत्रवाच्यपितृत्वमिति प्रयोगवारणाय गुणस्येत्युक्तं भावाद्धियमानत्वा
दित्यर्थः द्रव्यपदं सत्त्वरूपापन्नविशेष्यभूतार्थपरं यस्य शब्दस्य यो धर्मः प्रवृत्तिनिमित्तं स तदुत्पन्नभावप्रत्य
यार्थः तत्र गुणमात्रवाचिभ्यो रूपादिशब्देभ्य उत्पन्नस्य भावप्रत्ययस्य रूपत्वादिसामान्यमर्थः शुक्लादिशब्देभ्यस्तु
यदा गुणमात्रपरास्तदा तदुत्पन्नभावप्रत्ययस्य शुक्लगुणादिर्हि नि: शुक्लत्वादिजातिरेवार्थः गुणिपरत्वे त
गुणपरवेति विवेकः एवं स्वाणुमहद्दीर्घादिशब्दानामपि परिमाणमात्रवृत्तित्वात्तदुत्पन्नभावप्रत्ययस्य परि
माणमेवार्थः नन्वणुमहद्दीर्घह्रस्वत्वेति परिमाणविभागवाचकेतेषां धर्ममात्रपरत्वस्यापि दर्शनात्तद्भि
मात्रपरत्वमनुपपन्नमिति चेन्मैवं प्रयोगबाहुल्याभिप्रायेण तथोक्तेः एवं च घटत्वमित्यादौ अनेकघ त्वं
कारादिवृत्तित्वाज्जातिः गवादिपदानां तज्जातिमात्रवाचकत्वे गोशब्दस्वरूपं गोशब्दाभेदस्य जातावा
रोपात् शब्दस्वरूपस्यैव प्रवृत्तिनिमित्तत्वात् द्रव्यवाचितेन गोत्वादिजातिरेव भावप्रत्ययार्थः समासकृ
त्तद्धितानां तु केवलसंबंधानभिधायित्वेपि वस्तुतो जातिशक्तिपक्षेपि तत्प्रकारकव्यक्तिविशेष्यकबोध
स्यैव चित्रगवादिपदादनुभवगम्यात्तत्रापि जातिरेवार्थः संबंधिवृत्तित्वात्संबंधस्य प्रवृत्तिनिमित्तत्वात्संबंधस्त
दुत्पन्नभावप्रत्ययार्थः तेन राजपुरुषत्वमित्यत्र स्वस्वामिभावः पाचकत्वमित्यत्र क्रियाकारकसंबंधः
औपगवत्वमित्यत्र जन्यजनकभावो बुध्यते येन त्वपत्यप्रत्ययान्तान्न भावप्रत्ययस्य जातिरभिधेयेति म
न्यते तन्मते आदिकत्वमित्यादिवर्णान्तरघटितस्तद्धितनदाहार्थः गोत्रं च चरणैः सहेति जातित्वेन परिभा

पं. वितत्वादिति तेषामभिप्रायः उक्तं च वाक्यपदीये कृत्तद्धितसमासेभ्योऽभिधानं भावप्रत्ययेनान्यत्र रूढ्याभिन्नरू
सि.स्व. पाऽव्यभिचरितसंबंधेभ्यः गोरश्वरसमग्रपर्णलोहितशाल्यादीनां जातिविशेषावच्छिन्नद्रव्यवाचकतयात
उक्तत्वभावप्रत्ययस्य जातिरेवार्थः एवं च भक्तत्वहस्तित्वमिति कृत्तद्धितयोरप्युदाहार्यं अभिन्नरूपाऽव्यु
स्लो॰ ९ त्पादिशब्दाः नैव घटपटिमन्[illegible]पेन शुक्ल्यादितत्वात्तद्धितानामन्यापि तदुक्तं भावप्रत्ययस्य गुणएवार्थो
नसंबन्धः गुणगुणिनोर्जातितद्वतोरिवसमोयमित्यभिसंबन्धेन लोके निरूपणे न भेदप्रतिभासाभावात् लवि धा
नद्वाराऽभेदेनैव गुणिनि निरूढेनवृत्त्यत्वेनैः अव्यभिचरितसंबंधः सदादिः सतोभावः सत्त्वमित्यत्र जातिरेवार्थो न
न सत्तासत्त्वयोः संबंधः समवायाख्यः सद्वत्त्वतः सत्तासंबन्धव्यभिचाराभावात् राजपुरुषयोस्तु संबंध
स्यकादाचित्कत्वात्तत्र संबंधाभिधाने धवखदिरत्वमित्यत्रापि जातिद्रव्यत्वादिर्जातिः कृत्वमित्यादौ
तपचवर्णोपधयत्वकृपा ह्रस्वरूपसत्तासंनिसंबंधोवावस्तुतः कृषा ह्रस्वस्य वर्णोपचकेसकेतात्कत्वादिर्जा
तिरेवतत्रार्थस्त्वक्त उक्तं कस्मादेति भाष्यव्याख्यायाम् अथ यत्सत्त्वमित्यत्र व्यभिचाराभावात्संबंधानभि
धानेसत्तायात्प्यभिधानं न स्यात् तत्र सत्ताव्यभिचारइति वाच्यं सत्तासंबंधस्यापि तदव्यभिचारात्
संबंधिन्यसति संबंधस्यापि सत्त्वात् सत्यं तत्र सत्तासंबंधापन्नघालाघवात्सत्तायामेव शक्तिरित्यभि
प्रायात् सत्ताश्रयव्यक्तीनां कासांचिदनित्यत्वात्तत्रैव न तत्संबंधस्याऽव्यभिचारात् घटत्वाद्याश्रयव्यक्ती
नां च नित्यत्वाभावात् यत्तु जात्यादावनेकशक्तिकल्पने गौरवादुर्मत्वमेव शक्यतावच्छेदकं धर्मप्रवृ
त्तश्च इति तन्न धर्मत्वस्याप्यननुगतत्वात् अनुभवविरोधाच्च अत एव धर्मप्रतीति धर्मत्वेन ताद्रूप्येणावेति
ताद्रूप्यपक्षएव गुणाग्रहे दीधितावुक्तः ताद्रूप्येणावच्छेदकत्वादिनस्पर्शः घटेपटत्वंनास्तीत्यादिविरोधाच्च पट गं
धर्मस्य द्रव्यत्वादेस्तत्र सत्त्वात् तत्र पटत्वत्वादिना पटत्वादि लक्षणाया गौरवात् यदपि स्वत्वनाहान्निरूपस ४१

* नचातीतानागतघटत्व च
ट्वादेरभावस्यनैयायिकै
र्णीकारोस्तत्राघात्यभावा
त् *

तिसकलस्ववृत्तित्वसंबंधेनव्यक्तिरेवत्वाद्यर्थे जातौ प्रकारइति तदपिविचिंत्यं घटत्वपदोत्तरत्वप्रत्ययस्य
घटवाचकत्वापत्तेः घटत्वपदजन्यबोधेत्वर्थतया घटस्यैवप्रकारतया घटत्वपदेनानेविव घटत्वत्वपदे व्यक्ते
रेववाच्यत्वात् तस्माद्घटत्वत्वादिरूपेणघटत्वादेःशक्तिः नचघटेतत्समवेतत्वे घटनिष्ठान्योन्याभावप्रतियो
गितानवच्छेदकत्वे चसतितत्समवेतत्वं प्रमेयत्वादिवारणाय घटरूपादिवारणाय द्वितीयसत्यंतं प्राका
ग्भाववारणायविशेष्यं नत्वेवंसत्त्वमित्यत्रबोधानुपपत्तेः सदितरसमवेतत्वस्याऽप्रसिद्ध्यातदभावा
स्यदुर्ग्रहत्वात् सदितरस्मिन्सामान्यादेरेकस्याप्यसमवेतत्वात् सदितरवृत्तित्वाभावोक्तौ तत्सत्तायाअपिसा
मानाधिकरण्येनसामान्यादेर्वृत्तित्वात्तदभावानुपपत्तेः घटपदादेरपिकालिकविशेषणतयाघटेनवृ
त्तित्वाच्च एवंप्रमेयत्वमित्यादौप्रमेयेतरस्यैवाऽप्रसिद्धिः प्रमेयत्वा[illegible]प्रतियोगिताकभेदाऽप्रसिद्धेः
प्रमेयप्रतियोगिकभेदमात्रोक्तौ घटमादिरूपप्रमेयाभिन्नेव[illegible]दौ प्रमेयत्वस्यवृत्तित्वात्तदभावानापत्तेः ए
कत्वादीनांप्रतिव्यक्तिभिन्नतयासकलैकवृत्तित्वाभावस्य घटनिष्ठैकत्वस्य घटनिष्ठान्योन्याभावप्रतियो
गितावच्छेदकत्वात् एवमात्मेतरावृत्तेः सकलात्मवृत्तेश्च महत्त्वविशेषस्यात्मत्वपदात्प्रत्ययापत्तिः अ
त्रवार्तिकः तदन्यत्वव्यापकीभूतात्यंताभावप्रतियोगित्वं तत्त्वं लभ्याबोध्यते प्रतिवघव सामान्यादौसदत्व
त्वेतन्नसत्त्वात्यंताभावः प्रमेयत्वादौसकलप्रमेयवृत्तित्वेलक्षणं तन्निष्ठात्यंताभावप्रतियोगितानवच्छे
दकधर्मवद्बोधकत्वादेकत्वमित्यादौनदोषः एकत्वादेःसकलैकवृत्तित्वाभावेपिपटनिष्ठघटीयैकत्वा
त्यंताभावेएकत्वत्वस्यप्रतियोगितानवच्छेदकत्वात् घटनिष्ठैकत्वेपिएकत्वत्वस्यसत्त्वात् एकत्वत्वाव
च्छिन्नप्रतियोगिताकाभावस्यक्वाप्येकस्मिन्नसत्त्वात् नचघटत्वपदाद्घटरूपबोधापत्तिः घटनिष्ठात्यंताभा
वप्रतियोगितानवच्छेदकप्रमेयत्वस्यघटरूपेसत्त्वादितिवाच्यं तदन्यत्वव्यापकात्यंताभावप्रतियोगि

पं. तावच्छेदकत्वस्यापि धर्मे विशेषणत्वात् प्रमेयत्वेन तदभावात् वस्तुतः प्रकृतार्थतावच्छेदकबोधकत्वमु
सि.म. क्तमेव न दोषः एतेनाकाशपदाच्छब्दत्वविशेषस्यापि न बोधापत्तिः एवमनित्यत्वपदाद्द्रव्यत्वं घट इत्यादेः तत्र^
प्रकृतार्थतावच्छेदकत्वाभावादेव प्रतीत्यप्रसक्त्या धर्मित्वेन धर्मप्रवृत्ततेनोक्तार्थत्वात्विति वाच्यं घटत्वा
दिप्रकारकबोधस्यानुभविकत्वात् तस्मात्त्वादिप्रत्ययोनानार्थः घटादिपदसमभिव्याहारस्थलेनास्यार्था
स^ दकः यद्वा इतरत्ववृत्तित्वप्रभावः साकल्यवृत्तित्वं तदर्थः छिद्रमाः शक्तिस्वीकारात् इतवसमवेतत्वसा
मान्याभावस्याबाधितत्वात् घटादेरपि किंचिदंशे तद्घेतत्वात् विशेषाभावस्य वस्तुत्वादापत्तिप्रसक्त्या
त्वात् अत्रापि लघुनि शक्तिर्गुरुणि लक्षणेति तत्त्वं घटादिपदसमभिव्याहाराद्घटत्वादिलाभः घटो
नास्तीत्यादौ नञाद्यभाववत् नादेः प्रवृत्तिनिमित्ते शक्तिरिति चेन्नाप्यर्थक नीलोत्पलत्वमित्यादिवाक्यो
त्तभावप्रत्ययेन तदभावात् शाक्यत्वशक्यवृत्तित्वे च तत्तत्त्वमित्यादौ यानाधिकरणत्वादिप्रवृत्तिनिमित्तत्वय
ह्याख्यावच्छेदकधर्मत्वं तदिति सिद्धान्तात् वाक्यस्य च शाक्यं तथा कार्यात् अतएवाकाशमित्यादौ शब्दाश्रय
त्वस्याकाशपदे प्रवृत्तिनिमित्तत्वाभावेपि तद्धर्मभावप्रत्ययबोध्यत्वं नवत्वं प्रवृत्तिनिमित्तमेवेति वाच्यं कदा
चिच्छब्दाश्रयत्वेन कदाचिद्दृष्टद्रव्यातिरिक्तद्रव्यत्वेन च तत्तो धर्मिबोधात् तत्र कावकोपस्थितिनियमाभा त्र्य^
वात् एकपदे चैकस्मिन्नर्थे प्रवृत्तिनिमित्तद्वयानंगीकारात् नञ्क्रमगतिकल्ता शब्दाश्रयत्वादिनानियतोपस्थि
श^ तिरेव नास्तीति नचैवम[स्]काकाशस्य शब्दाश्रयत्वादिरूपेणानुपस्थितत्वात्कथं शाब्दबोधानुप्रवेश इति वाच्यं
यद्धर्मवत्त्वेन नियमितोपस्थिते यत्र शक्तिग्रहस्तत्र तज्जनकसंस्कारस्य तद्धर्मविषयकत्वनियमेन तन्नम कौ.
बोधकादेव तत्संयोग्यबोधनियमेनाकाशस्यापि तस्य भावादिनियमानुकत्वात् तदुपहिते शक्तिग्रहसंभवात् २२
स्वीयास्तत्प्रकारक शाब्दधीहेतुत्वस्य कल्पनात् शब्दाश्रयस्याकाशस्यत्वादिना शब्दाश्रयत्वत्वव्यक्तिविशेषय

विधायकमात्रं अर्थे घटपदस्य घटत्वादिवत् अन्यथा सत्त्वप्रयोगो न स्यात् आकाशपदेनैव शब्दाश्रयत्वस्यो
पस्थितत्वात् न चैवं घटादिपदानामपि घटत्वादौ शक्त्यनापत्तिकरीत्यैव घटत्वादिविशिष्टोपपत्तेरिति वाच्यं ते
षां नियतोपस्थितिकत्वेन वैषम्यात् केचित्तु शब्दाश्रयो धर्मी आकाशपदवाच्य इति मुख्यवाचकत्वेनैव वाक्य
प्रयोगोऽन्यथासिद्धः गृहीतशक्तिकस्य तादृशप्रयोगासिद्धेः नियतोपस्थित्यभावेऽपि अन्त्यादिपदवत् नाना
र्थत्वोपपत्तेः तावद्विशेषधर्मप्रतीतेश्च सत्यामन्यथाविरहत्वात् अन्यथाकारणाभावादेवानापत्तेः घटेत्याद्येक
व्यवस्थापकप्रवृत्तिनिमित्तयोर्द्रव्यत्वघटत्वयोः सत्त्वात् न चैकपदे तद्द्वेतानान्ति व्यक्तिभेदप्रसंगात् इति वाच्यं
आत्मपदप्रवृत्तिनिमित्तयोरात्मत्वज्ञानत्वयोर्भेदेऽपि तदभावात् तस्मात् शब्दाश्रयत्वप्रवृत्तिनिमित्तकत्वमेव वा
नत्वष्टद्रव्यातिरिक्तद्रव्यत्वं गौरवादित्याहुः प्रकृतमनुसरामः नत्रकर्मधारयो नाभावप्रत्ययेन पदार्थ
का१ तावच्छेदकरूपसामानाधिकरण्यं प्रतीयते इति तावच्छेदकः तत्र पदार्थतावच्छेदकत्वरूपेण नीलत्वादी
नां नपात्वतावच्छेदककोटिनिवेशः अननुभवविरोधात् नापि नीलोत्पलत्वादिरूपेण पीतत्वघटत्वादि
रूपेणापि तत्त्वीकारे शब्दानन्त्यप्रसंगात् नापि सामानाधिकरण्यमात्रे शक्तिः नीलत्वोत्पलत्वयोः समा
नघटकपदद्वयात्प्रतीतयोस्तत्र विशेषणत्वेनान्वयादिति वाच्यं तयोर्धर्मिविशेषणतयोपस्थितत्वाद
न्यत्रान्वयानुपपत्तेः अत्र केचित् तत्प्रत्ययस्य कर्मधारयघटकपदद्वयार्थान्वयः घटपटत्वमित्यादौ घ
टत्वपटत्वोभयबोधवत् कृत्तद्धितसमासेभ्यः संबंधाभिधानं त्वतल्भ्यामित्यस्य प्रायिकत्वात् सामाना
धिकरण्येऽपि स्थगितेव शक्तिः तथा च नीलोत्पलत्वमित्यत्र त्वतलाभ्यामुपस्थितयोर्नीलत्वोत्पलत्वयोस्त्व
प्रत्ययार्थान्तरेण सामानाधिकरण्येन इहाभेदान्वयः आकांक्षावैचित्र्याच्च कर्मधारयोपस्थिताभेदाप्र
प्रवेशाइत्याहुः अन्ये त्वेवं सति नीलोत्पलत्वमुत्पले इति वाक्यमयोग्यं नीलोत्पलत्वमनुत्पलत्वे इति वयो

पं
सि स

ण्येऽस्यात् सामानाधिकरण्यस्योत्पलाद्यवृत्तित्वादुत्पलत्वादिवृत्तित्वाच्च तस्मादङ्गीकृत्या नीलत्वोत्पलत्वयोरूप
स्थितौ नीलत्वसामानाधिकरण्यसंबंधेनोत्पलत्वे विशेषणं उक्तप्रवाहस्यापि संसर्गमर्यादया सामाना
धिकरण्यप्रतीतावेव तात्पर्यमित्याहुः अपरे तूत्पलत्वे स्वत्वावच्छेदकत्वसम्बन्धार्थः तथा चोत्पलावच्छेदे
न नीलत्वोत्पलत्वयोः सामानाधिकरण्यमित्यन्वयबोधान्नानुपपत्तिरित्याहुः परे तु नीलाभेदो हि नी
लत्वमेव भेदात्यन्ताभावस्य प्रतियोगितावच्छेदकरूपत्वात् भावयत्यथा च तादृशवृत्तित्वेन बोधः एवं च
नीलत्ववदुत्पलवृत्तित्वस्य बाधेऽपि नीलत्ववद्वृत्तित्वरूपसामानाधिकरण्यमुत्पलत्वे लब्धं न वा भे
दरूपनीलत्वस्य संसर्गविधानाभानान्नानुपपत्तिलाभ इति वाच्यसंबंधसंबंधस्यापि विशिष्टधीविषयत्व
मिति पक्षे तदनुपपत्तेः यद्वा नीलपदार्थतावच्छेदकनीलत्वस्य प्रकारतयैव भाना नीलत्ववदुत्पलवृत्ति
त्वभासमाने उत्पलत्वे नीलत्ववत् वृत्तित्वलक्षणसामानाधिकरण्यलाभ इत्याहुरिति संक्षेपः अ
त्र प्राहिकाः स्वरूपमेव जातिरिति सिद्धांतः सर्वथाभिदात्तेन वभिधमानागवादिषु जातिरिष्यते त
स्याः सर्वमात्रा व्यवस्थिताः तो प्रातिपदिकार्थवद्यावत्र्यर्थस्य प्रवर्त्तते सा नित्या सा महानात्मा तामाहुस्तत्वता द
य इति वाक्यपदीयादिस्वारस्यात् वृत्त्यादिते वे तद्धेदातिरी[illegible]पस्य घटस्य तथा च घटत्वमित्यत्र वस्तुतो घ
वंस्यो घटव्यक्त्यस्य वृत्तितादात्म्यानामत्यन्तमसंबंधेन ब्रह्मरूपामस्यैव बुध्यते घटत्वमपि न हि घट
त्वाणमेव समत्राद्रूपमेव न त्वतः किंकरीत्या घटे वृत्तित्वादिरूपमित्याहुः न तु समवायो सत्तातदात्म्याभावः
तस्य भेदनिबंधनत्वात् तथा च सत्ताव्याप्तिनिष्ठघटोपहितसत्तानादात्म्यं नास्तीति कथं घटत्वस्य
कत्वं [illegible] ग्रहणात्वृत्यतः प्राकृतनलो अधिकारोपवादे दिमनिबृद्धश्रुतिभिः सद्भवतलोः समावे
शार्थः गुणावयवादिभ्यः कर्मणि त्वतलो विधीनार्थस्य न व्यर्थं स द्रव्यं देवो न भवति तयोरनुवृत्तिः यत्तत्वाभ्या

गो
४१

वेऽत्रन्नेवैवतुर्ह्यो निवात् उक्तेरेव प्रत्ययनिर्देशात् सूर्वैगणवप्रातिपदिकसामान्येत्वतलोर्विधानादुभयत्राप्या
कालाविरहात् नतु तथापिचकारवैयर्थ्यं नचग्लायेर्थास्तत्रत्वतलाविनित्यर्थेगुणवचनादिभ्यः कर्मणित्व
तलोः सिद्धावपिअपवादसमावेशासिद्धेस्तदर्थश्चकारइतिवाच्यं आचात्प्रकृतिभ्यस्त्वतलाविनितिवाकयार्थादि
वत्तसिद्धेः नचप्रकृतिविशेषाद्विहितैर्विमनिजादिभिः प्रकृतिसामान्याद्विहिताणस्त्वतलोर्वाधप्रसक्तावस्यप्र
तिप्रसवार्थत्वादपवादसमावेशासिद्धावपिगुणवचनादिभ्यस्त्वतलोः कर्मणिविध्यसिद्धेस्तदर्थश्चकारइति
वाच्यं प्रकृतीवर्थेवाविशेषादवधिमत्वेनापेक्ष्यत्वतलोर्विधानादुभयसिद्धेः अत्रभाष्यं नञस्तत्पुरुषात्समावेशा
र्थश्चकारइति अन्यथास्त्रीपुंसाभ्यांप्राक्भवनात्स्त्वैवष्ठार्थेभविधीयमानौनञ्स्नञौत्वतलोर्बाधकौस्यातां भव
नादित्यवधुपादानसामर्थ्यात्प्राग्भावेनञ्स्नञौवपिसिद्धिः अन्यथाप्राग्भवेनेतिनियवतत्रब्रूयात् वस्त्वर्थेतयोरप्र
वृत्तेरकृतत्वात् क्रियाभावः स्त्रैणंस्त्रीत्वंस्त्रीता पुंसोभावःपौंस्नंपुंस्त्वंपुंस्ता संयोगान्तस्येतिसलोपः पुमःखयी
ना तिमस्यरुत्वेपर्यायेणानुनासिकानुस्वारौविसर्गेकृतेसंपुंकानामितिसत्वं नचानुनासिकपदेषत्वापत्तिः सत्व
स्यासिद्धत्वात् ॥ नञ्पूर्वात्तत्पुरुषात् चतुरसंगतलवणवटयुधकतरसलसेभ्यः ॥ इतः परेभावप्रत्ययाश्चतुरा
युत्तरपदनञ्तत्पुरुषभिन्नान्नञ्तत्पुरुषान्नस्युः आपतित्वंआपटुत्वं नञ्पूर्वात्किं वार्हस्पत्यं अविद्यमानाःपटवो तत्पुरुषात्किं
यस्यसोऽपटुस्तस्यभावआपटवंअपटुत्वमितिकिं आचतुर्यं आसंगत्यं आलवणमित्यादि ननूत्तरेषांभावप्रत्यया
नांप्रकृतिविशेषपुरस्कारेणैवविहितत्वात् नत्रचनञ्पूर्वायाःप्रकृतेरभावात् निषेधवैयर्थ्यं नचतदन्तवि
धिनाप्राप्तिः ग्रहणवतार्थेनप्रातिपदिकेनतन्निषेधात् नचपत्यन्तपुरोहितादिभ्योयक् हायनान्तयुवादिभ्योण् इ
गन्ताच्च लघुपूर्वात् योपधाद्गुरूपोत्तमाद्वुञ् एषांनञ्पूर्वात्तत्पुरुषादपिप्रसंगोस्त्वेवेतिवाच्यं पत्यन्तसूत्रात्प्रे
मैवतत्सूत्रस्यपठितत्वात् उक्तवत्ताबहूनामेवसिद्धेः नचात्रप्रदेशेनिषेधाधिकारसामर्थ्यादिमनिजादी
नामप्यत्रनिषेध्यत्वसिद्धेर्नञ्पूर्वाच्चतत्पुरुषादिमनिजादयःप्रत्ययाभवन्तीतिज्ञाप्यतइतिवाच्यं अष्टपुत्वप

पं.
सि.कौ.
२५

रमष्टत्वमित्यादौ त्वतलोरेवेष्टतया इमनिजादीनामनिष्यमाणत्वात् ननु नञो भावप्रत्ययः सापेक्षादपि भवती
ति ज्ञापनार्थोयं प्रतिषेधः तेन नञ्समासादन्यो भववचनः स्वतोन्तरपदद्वंद्वार्थमिति वचनेनगतार्थे तथाहि ज्ञा॰
दपि सर्वं भावप्रत्ययोत्पत्तौ अव्ययपूर्वपदप्रकृतिस्वरस्यान्तरपदवृद्धेश्चासिद्धेरिति चेत्सत्यं नञो गुणप्रतिषे
धे संपाद्यर्हहितालमर्थास्तद्धिता इति गुणप्रतिषेधबाधकान्नञः परेषां संपाद्यर्थादितद्धितानामनेनोदात्तवि॰
धानेन नञार्थसापेक्षत्वेपि तद्धितोत्पत्तेर्ज्ञापितत्वात् वत्सेभ्यो न हितः इत्यादौ नञर्थान्वयात् पूर्वं तद्धितानुत्पत्तौ॰
तद्धितान्तस्य नञ्समासानुपपत्तेः चतुर्भ्यो नञ्समास इति तद्विध्यर्थं न नियमार्थं नचैव वत्सतरादिभ्योपि नञपेक्षेभ्य
स्तदापत्तिः अनभिधानात् नञ्समासोत्तरं तत्र त्वलाणादेः आकृतिगणत्वात् जित्यावत्य् यमित्यादि सिद्धं यथातः॰
यथयथाशुचयोः पर्यायेणांतोदात्तत्वं विधानकस्यन वेत्यादौ परे वृद्धिविकल्पस्तु नञ्स्यानजरीत्येव भाष्यकृता प्रत्या॰ विधानकस्य
ख्यास्यमानत्वात् भावविवक्षायां नञ्प्रतिषेधविवक्षायां अयथ्यामात् यथ्यायथमित्यस्य सिद्धेः नपत्यमिति रस्य
चतुष्पतिश्वाहृस्यपत्यं तन्त्वाभावात् त्वतलोर्यो नञ्समास इति वचनान्नञ्समासोत्तरं त्वतलो भवतः पट्टमृदुष्यज्ञा
यनां तेभ्यश्च नञर्थाकांक्षायामपि कृत्तामकाञ्चावप्रत्ययानन्तरमेव नञ्समासः अपाटकममार्दवमकम
हैहायनमिति अशुचिशब्दान्नञ् इगंतात्त्वलघुपूर्वादिति सिद्धमेवाशु नशुक्लस्य भाव इत्यादौ सापेक्षादपिष्यञ्
पत्तेरशौक्ल्यमित्यादि तदयमत्राकरार्थः यदि भावनिषेधयोर्विवक्षा ग पश्चात्प्रत्यय पवनञ्समासात् त्वत॰
लौ तद्विहितेत नञ्समासे भववेलत्यवशात्तु कृतिस्तु नेत्तो॥ इष्टादिभ्य इमनिज्वा॥ न वाक्ये महाविभाषयैव सिद्धे
त्वतलावप्यावत्यादि त्वेनेनेति वाग्रहणं वैयर्थ्यमिति चेत् अत्र वार्तिके इष्ठादिभ्यो वा वचनमण्समावेशार्थमि
ति अस्यार्थः तत्रोत्सर्गापवादौ विभाषा तत्रापवादनिर्मुक्ते उत्सर्गस्य न प्रवृत्तिः विभाषा या वाक्यानुज्ञानार्थत्वा॰
त्॥ पार्वमध्येषष्ट्यावापीलाभ्यावत्यादि लिंगात् अतो णसमावेशार्थे विभाषोक्तिः इष्ठोर्भावः प्राथिमा प्राणित्वप २५
लत्वं तेनेष्ठादिष्विगंता षेत्यण् चंडवजादिष्वगुणवचनेष्वष्यञ् वालवत्सादिषु वयोवचनलक्षणोण्न वनस्यां

समाविशतीतिभावः इकन्तोहलादेरिति वत्वं टेरितिटिलोपः इष्ठस्नक्उत्सादेरमदि पद तेउ बहू अस्यभूदेश
स्य इकारलोपस्यच वक्ष्यमाणत्वात्प्रेमेतिरूपं साधु जाग्रु सत्रु उरुमस्यवरादेशोवरिमेतिरूपं चउरुत्वउर्वा
द्रुल अल्पधनबालह्रोउपाकवत्स थिक्कापलेवत्सिमवत्सलत्वमित्तिश्रीहर्षः मंद ऊरुत्न ऋस्वदीर्घादिषु
त्वदृक्षिय ऋस्वादीनांऋस्मिमाद्राघिमाक्षेपिमावोदिमाप्रेमेतिबोध्यं॥ वर्णदृढादिभ्यः ष्यञ्च॥ व्रादिमनि
त्वं शौक्ल्यं शुक्लिमा दार्ढ्यं गुणवचनत्वात्सिद्धेरमनिजर्थमारंभः ष्यञ्‌ यद्गुणसूत्रवर्णार्थं हठयविदृप्रभृश
कृशवक्राम्रलवण वेर्यातलाभमतिमनः शारदानां वियातत्वं वियातता वियातिमा वैयात्यम् विला
भत्वं विलाभता विलाभिमा वैलाभ्यं विमतित्वं विमतिता विमतिमा वैमत्यं इगंतत्वात् दणपि वैमतं विमन
स्त्वं विमनस्ता विमनतिमा वैमनस्यं विशारदत्वं विशारदता विशारदिमा वैशारद्यम् समसंप्रतिमतिमन
सोः संप्रतित्वं संमतिता संमतिमा सांमत्यं इगंतत्वादण् सांमतं पूर्वसमनस्त्वं इत्यादि॥ गुणवचनब्राह्मणादि
भ्यः कर्मणि च॥ चाद्भावे कर्मपदं क्रियाकार्योभयपरं शरीरार्थसमात्रसाध्यशोचादिक्रिया शास्त्रेणविहि
तोयागादिः कार्यमित्याहुः गुणवचनाः सामानाधिकरण्यवैयधिकरण्याभ्यां गुणबोधकाः शुक्लादयः तेन
गंधादिव्यावृत्तिः चंदनस्य गंध इति वैयधिकरण्यमात्रेण बोधकत्वात् शौक्ल्यं कार्यं ब्राह्मणस्य भावः क संपि
र्म वा ब्राह्मण्यं जातिविशेषोऽध्ययनादिश्च ब्राह्मण माणव अर्हतोनुम् अर्हः प्रशंसायामिति शतृ अर्हतो
ऽर्हतः प्रत्यायर्थवृत्तिः पित्वेडीषर्थं नत्सामर्थ्यादेव स्त्रीत्वं आर्हंत्यमार्हंती आचितमाचिती मैत्र्यं मैत्री त्यमः
उपविष्टदार्किं नार्हन्ती नियाः कित्वेनोचितीति श्रीहर्षः चोरस्तेनस्यधाधयस्य परापथ्य एकभावस्थिभावत्रि
भाव अन्यभावपर्यायवत् स्वार्थेविधानार्थं अन्यभावं कालरीता वायादिनिवार्तिकप्रयोगात् अपप्र वा
योगोयमितिभट्टपादाः क्लिस्त्वं सर्वपादिनः शोढिमात्रमितिदीक्षिताः अविविविवेश्यस्यापितद्धकस्य साधुत्वात् अ
विशाहृस्य विभक्तिविशिष्टस्याऽविकशहृस्य तन्नत्वादितस्याउत्कृतत्वात् निषेधमानाभावात् असुवामीयस्तर्मिति

पं.
सि॰कौ॰
२५

व्यवहारात् नासदासीदित्यत्र नासदासीन्नोसदासीत्तदानीमित्यत्र तकारात्पूर्वभागस्यैवा
नुकृतत्वात् प्रातिपदिकत्वाद्यावन्नर्थकैकदेशानुकरणदर्शनाच्च अनेनैव तसंपाशिन् संवेशिन् संवेदिन्
बहुभाषिन् शीर्षघातिन् समस्थ परमस्थ विषमस्थ मतिस्थ शावलय कुशल निपुण बालिश अलिस दुःपु ॰पिशुन॰
रुष कापुरुष राजन् गणपति अधिपति विशालिन् शिंशपा विपात निपात आकृतिगणोऽयं तेनत्रावतस्य
मित्यादिबोध्यं तदुक्तम् दयनाद्यर्थे तावतश्चैव संपद्यमानेति वार्तिकव्याख्यायां तरतमशब्दाभ्यामर्थे तरतम
इत्यनुकृत्यतस्यभावस्तारतम्यमिति शिष्टप्रयोगप्राचुर्यादुपपादनीयमिति पाठस्तु प्रपंचार्थो बाधकबाध
नार्थः कार्यविशेषविधानार्थश्च चतुर्वर्णादीनां स्वार्थ उपसंख्यानं प्रत्ययविशिष्टो ब्राह्मणो भावकर्मनिवृत्त्यर्थ
मिति स्वार्थिकत्वं चत्वारो वर्णाश्चातुर्वर्ण्यं चत्वारो वेदानधीते इति तद्धितार्थे द्विगुः द्विगोर्लुगनपत्ये इत्यणप्रत्ययेन
र्थकस्याणो लुक् चतुर्वेदपदवाच्यत्वेपि चातुराश्रम्य यज्ञाचतस्रो विद्या अधीते विद्यालक्षणस्य कल्पादेरिति
ठकः सर्वसादेर्द्विगोश्च लः इति लुक् चतुर्विध्यपदवाच्यत्वेपि अनुशातिकादेराकृतिगणत्वादुभयपदवृद्धिः
स्वार्थिकाः क्वचित्प्रकृतिलिंगवचनानि सेनायन्तलोपश्च सेनयाहो निर्यकारोत्र स्नात्यन्तापतयेनम इत्यादि दर्शनात्
स्यधातोर्यकारः रहितस्यापि स्वीकृतत्वात् तस्य भावः कर्मवा तत्वं पादसमाप्तिपर्यन्तं भावकर्मणोरर्थयोरा
धिकृतत्वात् न तु व्यंजनमात्रलोपे प्रचोदनावाया वहत्य याऽऽदेशः स्यात् यस्येति चेत्यकारलोपस्य पूर्वविधौ स्था
निवद्भावात् संघातग्रहणात्वलोत्यस्येत्यकारमात्रलोपः स्यात् मैवं यस्येत्यनेनैव तत्सिद्धे शतेमसामर्थ्यादुभ
यलोपसिद्धेः अन्त्यलादेशास्यस्यानिवद्भावनिरासात् नानर्थके लोन्त्यविधिरिति तु नोक्तं प्रयोजनाभावादिति केय्य
फि॰ टः॥ सख्युर्यः॥ सख्यं॥ कपिज्ञात्योर्ढक्॥ अर्थयोर्नात्रयथासंख्यमेव पत्यन्तपुरोहितादिभ्यः हायनान्तयुवादिभ्यः २५
इत्यु सेनान्तादिभ्य इत्यत्र बोध्यं अयापित्राते यो शैथिल्य यस्सिकापेयन्तर इत्यपि इति सूत्रावेः॥ पत्यन्तपुरोहितादिभ्यो
यक् सैनापत्यं पौरोहित्यं पत्यन्ताल्लक्षणपदवादः॥ राजास्से॥ राजशब्दात्समासेयगितिगणसूत्रार्थः समासेनिषेधो

अश्वकर्णो राजशब्दस्य नंदेन विधिज्ञापनार्थः तेन राज्यमित्यत्र षष्ठी समासेन ब्राह्मणादिपाठात्ष्यञ् आदिराज्यं
त्वैवैशिष्यः अत एव राज्ञः कर्म राज्यं ब्राह्मणादित्वात् ष्यञ् इति शावर भाष्यवित्यमिति भट्टपादाः ब्राह्मणादेरा
कृतिगणत्वादेव नंदेनात्ष्यञ् सिद्धो न च राजशब्दोपघञ्च समावेशार्थः तेन समासे ष्यिञमिति केचिदिति हरदत्त
समाधवाद्यः सेन ग्रामिक चंडिक वर्मिक धार्मिक शीलक तितिक्षक अंजलिक कवचिक परिषिक प्रतिक
सांजलिक सार्वथिक सूचक ॥ आणः भृत्यादिवयोवचनोद्गात्रादिभ्यो ञ्‌ ॥ आणिजातीत्येवमवचमिति नृपेश्च पर्यायश्च
ज्ञानोद्गुरुकुलवत्स्वयोर्वनादेवग्णीयत्वात् आश्व औष्ट्र वयोवचनं कौमारं कैशोरं उद्गात्रादि ऋग्वेदेन होत्रमऊ
वेन यजुर्वेदेनाध्वर्यवं सामवेदेनौद्गात्रं उद्गात्रहोतृ नेतृ प्रतिहर्तृ प्रशास्तृ भर्तृ रथ गणक पत्नि गणक
सूक्ष्म इक्षु अथर्वधूर्त भगाम महत्ते सौभगाय अत्यत्र ब्राह्मणादि त्वात्ष्यञ् सौभाग्यं इगन्तासिद्धिवतिडभ
उष्ट्र घपदस्यवृद्धिः इहकर्तिवचनेभ्योहोत्राभ्य इतिछस्य इकण्या गुणवचनेनिष्पन्नो वध्यशाद्धादिर्गिताद्वि णाश्रे ह
पवादो ञ्‌ सौभाग्यमस्येद सैन्य अछ्यादसत्वात्ष्यञ् अत एव सौभगायत्यनोत्र वपदस्य वृद्धिः सामनात्तषुवा त्य
दिभ्योऽण् हैहायनं यैहायनं यौवनं अनिति प्रकृतिभावः स्थाविर्यं श्रोत्रियस्य यलोपश्च वाच्यः वा देशस्य इ
व श्रोत्रियस्य भावः कर्म वा श्रौत्रं उक्तवार्तिकीति यलोपः श्रोत्रियशब्दस्य छन्दोऽधीत इत्यर्थे निपातितत्वा
त् छन्दसः श्रोत्रभावो घश्च प्रत्यय इति पदेयस्य लोप इत्युक्ते वाक्यार्थे पदवचनमिति पदे तु घपाठेन इये
ति शब्दस्वरूपलक्षण इति कैयटः यलोपश्चेति पाठेन इयाशब्दस्य यस्येति चेति लोप इत्यपि नेनोक्तम् यद्वस्य
विव आभ्यां वयोवचनलादेगिशाभेस्वरार्थम् अण्विधानं होत्र यजमान ॥ इकषासे ॥ एकषष्ठाद्वासमासे ऽण्
यो कं षसमासेन राज एकषत्व नाशक कटुक श्रवण कमण्डलु भस्त्रा क्रुहृदय सुहृदय अहृदयाऽसे स
मासेन हृदयता सभ्रातृ दुर्भ्रातृ वृषपरिव्राजक सब्रह्मचारिन् अनृशंस हृदय चपल कुशल निपुण
पिशुन कुतूहल क्षेत्रज्ञ चपलादयः पत्र्व ब्राह्मणादिषु पठ्यन्ते चापलं चापल्य कौशलं कौश मित्यादि
ल्य

५
सि स
२६
९६

इगन्ताच्च लघुपूर्वात् शुचेर्भावः शौचं मौनं काव्यमिति ब्राह्मणादित्वात् इगन्तात्किं चटत्वं लघुपूर्वा॰
त्किं पाटुत्वम् इगुपेत्यपूर्वत्वग्रहणं नेह प्रतिपाटुत्वं ॥ योपधाद्गुरूपोत्तमाद्वुञ् ॥ योपधादिति गुरूपोत्तमा॰
दिति च बहुव्रीहिः प्रातिपदिकविशेषणं चैतत् रामणीयकं आभिधानीयकं सहायाद्वेति वक्तव्यमुत्रेण
नित्ये प्राप्ते विकल्पः साहाय्यं साहायकं ॥ द्वंद्वमनोज्ञादिभ्यश्च ॥ शैष्योपाध्यायिका मानोज्ञकं मनोज्ञ प्रियरूप
कल्याण मेधाविन् आढ्य कुलपुत्र छान्दस छात्र श्रोत्रिय चोर धूर्त युवन् ग्रामपुत्र ग्रामखण्ड ग्रामकुमार
अमुष्यपुत्र शातपुत्र ॥ गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ श्लाघादिषु विषयभूतेषु गोत्रवाचिनश्च वुञ् चरणवाचिनश्च १
त्र १ गोत्रचरणयोः सहेति ज्ञानित्वाप्राणभृज्जातीत्यत्र प्राप्ते आरंभः अपत्याधिकारादन्यत्र लौकिकगोत्रग्रह॰
णादपत्यमात्रमत्र गोत्रं तेनाऽपत्यप्रत्ययान्तेभ्य इत्यर्थः प्रवराध्यायपठितेभ्य इत्यन्ये श्लाघाविकत्थने
अत्याकारोऽधिक्षेपः तदवेतस्तत्प्राप्तस्तद्गतो वा अवपूर्वादिणो गत्यर्थे ॥ चरणं गोत्रं च चरणसंबंधिभावकर्म
परश्च गार्गिकया श्लाघते गार्ग्यत्वेन विकत्थत इत्यर्थः गार्गिकयात्याकुरुते गार्गिकामवेतः एवं काठिका॰
होत्राभ्यश्छः १ या श्लाघते इत्यादि श्लाघादिषु किं गार्ग्यत्वं कठत्वम् ॥ होत्राभ्यश्छः ॥ होत्रेति स्त्रीलिंगः बहुवचनेन विशेषग्रहणा॰
र्थम् अच्छावाकस्य भावः कर्म वा अच्छावाकीयम् मैत्रावरुणीयं नेष्ट्रीयं पोत्रीयम् ॥ ब्रह्मणस्त्वः ॥ त्वविधेरपवाद
ब्रह्मशब्दान्तः स्यात् पर्वेण प्राप्तस्य छस्यापवादः नेति वाच्ये त्वग्रहणं तलोऽपि बाधार्थम् अन्यथा छस्यैव बाधः
स्तः १ स्यात् ब्राह्मणशब्दपर्यायाद्ब्रह्मशब्दात्त्वतलौ एव अलिङ्गस्येव ब्रह्मग्रहणात् त्वतलोर्नञ्स्नञोरधिकारः
समाप्तः ॥ इति श्रीसिद्धान्तव्याख्याने पञ्चमस्याध्यायस्य प्रथमे पादे द्वितीयमाह्निकं पादश्चायं समाप्तः ॥

श्रीः ॥ धान्यानां भवने क्षेत्रे खञ् ॥ भवनमित्यधिकरणे ल्युट् उत्पत्तिभूमिरित्यर्थः व्रीह्यादिपदसमभिव्याहारात् धान्यानि मि॰ गै॰
लितयोगकर्तरि षष्ठी सैव समर्थविभक्तिः बहुवचनं स्वरूपग्रहणनिरासार्थं अलौकिकवाक्ये तु एवादस्ता म॰ २६

ष्योऽन्नत्सिद्धिः सप्तानां भवने क्षेत्रे मौद्गीनं धान्यानां किं त्वणानां भवने क्षेत्रे भवने क्षेत्रे किं सप्तानां भवनः क्ष-
त्रलेः तत्स्थित्यधिकरणमित्यर्थः ॥ व्रीहिशाल्योर्ढक् ॥ व्रैहेयं शालेयं व्रीहिपदस्य तन्दुलप्रकृतिरर्थः शा-
लिपदस्य न हि शेषः कृतेणप्राप्तस्यायमपवादः यवयवकषष्टिकाद्यत् ॥ अत्रापि सामर्थ्यान्विक्षेत्रता [illegible] यव्यं
यवक्यं षष्टिक्यम् ॥ विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥ पक्षे भावपने [illegible] तिल्यं तैलीनं माष्यं माषीणं उम्यं
औमीनं भङ्ग्यं भाङ्गीनं अणव्यं आणवीनं नित्यत्वनिभाषाविकल्पारंभः नन्वउमाभङ्गयोर्धान्यत्वाभावः य-
मेषु तत्त्वाद्भावात् यवाश्रमे माषाश्रमे इति वमेषा तस्य छन्दः अनकृत्वा अवणाद्वमेषा तद्भन्नरउवाकवाची
यद्वावमेषा हेमकारान्न स्यात् उक्तवृणमकावस्तृत्वात् [illegible] णार्थः चमशाहोविधिनेपेष्टु तवमाश्रेउवाकाः ॥ अ-
धायाश्ववाकयोर्विनिकृस्यलक् ॥ नैवेवमत्रत्वम् ग्रहणं विनानाध्यानदक्षोमङ्गनिवार्यं अत्रहणानलाभात्
नैवेवं व्रीहिशाल्यादित्यादावपि तदापत्तिः धान्यग्रहणासंबंधेनैव तदनुवृत्त्या व्रीह्यादिभिर्वाच्यविशेषैः संभ-
तदभावात् भवने क्षेत्रे इत्यस्य तु प्रत्ययार्थत्वान्नधेयत्वेयापपत्तेः विभाषेत्यादिसूत्रे तु धान्यानामिति संबं-
धेनाप्यनुवृत्तिरिति सिद्धेः यद्वा मङ्गकस्तत्या [illegible] स्वविशेषाद्युत्ति अधिकाराणां प्रयोजनानुरोधित्वात् अथवा
विषयान्वेवुविनार्थस्योत्सर्गस्य न हि विषयकत्वेन निश्चितोऽपवादो बाधकः एवं तत्रापि धान्यानुवृत्तेरस्य
त्वेनोनानन्तरीयककृतया मुख्यः अनूनात्वापि न दपवादाभ्याम् [illegible] बाधः संदिग्धसमस्त [illegible] नबाधे न इति
न्यायात् नैवेवेहक्षानसाहाय्यानिकभावाद्युपपत्तिः तत्रविशेषणाविरोधाभाव प्रसंजितयत्सामान्यशास्त्र-
स्यतात्पर्येण सङ्कोच्यते अत्रत्वनुवृत्तिसंभावितमिति भेदात् यदि विशेषणात्तत्र न स्यात्तदा न हि विषये-
पि सामान्यशास्त्रस्य तात्पर्ये नास्यम्यं स्यादिति विशेषशास्त्राभावस्य विशेषविषयसामान्यशास्त्र प्रवृत्ति-
प्रसंजकत्वात् शास्त्रतात्पर्यस्य बाधितुमशक्यत्वात् अत्र त्वनुवृत्यासंभाव्यमानतात्पर्ये नतु प्रसंजितं
सिद्धस्यापादकत्वानुपपत्तेः अथवा विभाषाग्रहणमेवज्ञापकं विभाषाग्रहणादिरूपयत्नविशेषाभावे

यथ^
ख^

पं॰
सि॰ स्व॰
२२
२७

ऽनुवर्तमाना अप्यधिकारान्न संबध्यत इति अन्यथा तु तस्यैव नित्यो विभाषाग्रहणस्य वैयर्थ्यात् अत्र धिनोतीति
धान्यपदे योग स्तु अन्तपव धान्यमभिसंधित्तु इदं देवानिति मंत्रः चमकेनुवाकस्तु धान्यपरिगणनार्थः केषांचिद्ध न॰
धान्यानामप्यपाठाद् धान्यानामपि अन्येषां पाठाद्व शणसप्तदशानि धान्यानीति स्मृतेरेव न निर्णायकत्वात् न च वो
माभंगयोरप्युपादानात्॥ सर्वचर्मणः कृतः खखञौ॥ तृतीयेह समर्थविभक्तिः कृत इत्यत्र करणस्योचितत्वात्
सर्वचर्मणा कृतः सर्वचर्मीणः सार्वचर्मीणः सर्वचर्मणा कृत इति सर्वशब्दस्य कृतविशेषणत्वाद् असामर्थ्येपि च
र्मशब्देन सह समासो निपातनसामर्थ्यात् सर्वेण चर्मणा कृत इत्यत्र तु न भवत्यनभिधानात्॥ यथामुखसंमुख
स्य दर्शनः खः॥ अव्ययसम इत्येव यथामुखम् न च समाह शेय यथाशब्दस्याव्ययीभावनिषेधान्न तत्पुरुषपत्तिः उक्तं निपा
तनात्सिद्धिरिति वृत्तिकारः अन्यत्र पदार्थानतिवृत्तौ यथा शब्दः यथामुखीनः सीतायाः ऽनुमुखे बहुलाभमिति भा य॰
हि प्रयोगात् सीतायामुखं अननतिक्रम्येत्यर्थादित्याहुः समः सर्व मुखं सम्मुखं सर्वार्थकसमशब्दस्य निपातनाद्व स॰
कारलोप इति भाष्यं संशब्दस्य निपातनस्याभिमतार्थबोधकत्वाभावादिति कैयटः प्रत्ययसंनियोगेनाकारलो २॰
पनिपातनाद्विग्रहे न समशब्दस्यैव प्रयोगः दृश्यतेऽस्मिन्निति दर्शन आदर्शादिः॥ अधिकरणे ल्युट्॥ यथामुखमित्यव्य
यीभावस्याप्युत्तमगंगादिवत्तत्त्ववचनत्वात्कर्मशक्त्यावयोपपत्त्याक्तयोगलक्षणा षष्ठी अमादेशः यथामुखं
विष्यत्सत्तायां माभूदिति तत्र संप्रतिसत्ता बाह्यसत्ता तस्यां प्रत्ययो न त्वतीतानागतवस्तुपरामर्शिबुद्धिसत्त्वोपा
त्तिनायामुपचरितायामित्यर्थः सद्भिन्नस्य लडादेशान्तस्य वर्तमानकालविषयत्वात् भूतभविष्यत्ताः सत्तेति
संबंधानुपपत्तेः भूतासत्तेत्यादेरभेदान्वयस्यापर्यवसानात् अथापि अयस्य भूतभविष्यतोर्बुद्धावेकसत्तायामा
पितयान्वं तथापि तस्या अवर्तमानत्वान्न प्रत्ययः तेन गावोऽस्यासन् भविता वास्येत्यर्थे गोमानिति न प्रयोगः
केचित्तु अस्तिर्व्याहारस्य क्रियापदाभावे आवश्यकत्वात् तदभिप्रायेणान सत्तापदार्थाव्यभिचरतीति सर्वं पूर्व
भाष्यमित्याहुः तच्चिन्त्यं संप्रतिसत्तायामिति परिहारानुपपत्तेः लडन्तादस्तिशब्दाद्वर्तमानसत्ताया एव प्रती
तेः राजपुरुष इत्यादौ पुरुषसत्ताप्रतीत्यर्थमस्ते राज्ञोपि संबंधप्रतीत्यर्थं तदभावाद्व्यभिचाराच्चेति केचित्
अथ विद्यमान एव देवदत्ते तज्जीवीनामतीतानागतत्वप्रतिपादनाय गोमानासीद्भविता वेति प्रयुज्यते न च दे
वदत्तस्य तदव्ययानर्हत्वं गवान्वये तद्बहुवचनापत्तिरिति वाच्यं गुणधर्मयोरतीतानागतत्वयोर्देवदत्ते रूप

पं.
सि.स्कं.
धं.
40
1

प्रधानेऽध्यारोपणात् । तत्र प्रकृत्यर्थस्य संप्रतिसत्तायां अभावात्प्रत्ययो न स्यात् । नैवं । उक्तार्थे गोमानित्यप्रयोगात् भूत-
सत्तायां भविष्यत्सत्तायां वा गोमत्सत्तायामेव गोमानासीद्भविता वेति प्रयोगात् । न चैवं वर्तमानस्य विद्यमानत्वान्मत्सत्तायास्त-
थात्वमुपपन्नमिति वाच्यं । अवस्थान्तरे विद्यमानत्वेऽप्यवस्थाविशेषस्य भूतभावित्वादेव तद्वत्यपि तथा व्यपदेशा-
त् । ईश्वरोऽयमासीदित्यादिवत् । यदि तु गावोऽस्याऽसन् भविता वेत्यर्थे गोमानिति स्यात्तदा प्रकृत्यर्थोपाधेर-
तीतादिसत्तायाः प्रत्ययार्थेनैव प्रतीतत्वात्तदुपाधिकाच्चकस्यासीदित्यादेः प्रयोगो न स्यात् । दण्डः प्रहरणम-
स्यां क्रीडायां दाण्डा क्रीडेत्यादौ प्रहरणादिशब्दानामप्रयोगात् । ननु सामान्यतोऽवगतस्यापि विशेषप्रतिपादना-
य तत्प्रयोगः । यथाभ्युद्यत इत्यादौ प्रसनक्रियायामेतेन प्रतीतावपि तद्विशेषस्योद्दमनादेर्बोधाय प्रयुज्य-
मानानामन्यतमस्योपसर्गस्य । अभिमन्यत इत्यादौ च प्रतीयार्थभवनविशेषावगमाय समुद्भवोपपत्तिसिद्धापि
गोमानित्येतावता सत्तामात्रप्रतीतावप्यतीतानागतविशेषावगमाय आसीदित्यादेः पृथक्प्रयोग इति चेन्नैवं
गावोऽस्यासन्निति वाक्य इव गोमानासीदित्यत्रापि आसीदित्यस्य बहुवचनान्तत्वप्रसंगात् । एवं भवितार इत्यर्थो-
प्यापाद्यम् । तस्माद्विद्यमानसत्तायामेव मतुप् । गोमानासीदित्यादिकं तु अवस्थाविशेषहेतुनैव । अस्तिर्भवन्तीप-
रः तिसत्तायाश्चानंगत्वात् । तथा च शब्दशक्तिस्वाभाव्यात्प्रत्ययेनैव प्रकृत्यर्थसत्तावगमात्तद्वाचिपदा-
ऽप्रयोगः । अंगीकृतमतस्य प्रकृत्यर्थस्य मतुबर्थविशेषणत्वान्न कार्यमस्तिग्रहणं । न चैवं गोमानासीदित्या-
दावनुपपत्तिः । धातुसंबन्धे प्रत्यया इत्यत्राधिकारलभ्यस्यापि प्रत्ययस्य पुनरुपादानं धात्वधिकारादन्यत्र
विहितानामपि धातुसंबन्धे साधुत्वार्थमित्युक्तत्वात् । तत्र च प्रत्याख्यानपक्षेऽपि अग्निष्टोमयाज्यस्य पुत्रो भ-
वितेत्यादिवत्स्वकालविहितप्रत्ययानामविरुद्धकालार्थकाख्यातान्तक्रियानुरोधेन तत्समानकालार्थसंपत्तेः
अवस्थाविशेषस्यातीतानागतत्वप्रतीतेः । न तु वर्तमानसत्ताया अभावप्रतीतिः । तदर्थकमतुपो निवृत्तिप्रसंगः । प-
दान्तरसमभिव्याहाराद्धि शुद्धकालप्रतीतेर्बहिरंगत्वात् तदनुरोधेन पूर्वप्रवृत्तस्यान्तरंगस्य पदसंस्कारस्यानि-

गौं
धं.

त्त्ययोगात् ग्रामान्नागच्छतीत्यादौ तथात्वप्रसङ्गात् अत्रायं सिद्धान्तः उक्तञ्च न्यायास्ति क्रियालाभेपि च नरत्वविग्रह
णं नियमार्थम् विशेषणान्तरप्रके प्रकृत्यर्थे माभूत्किं तु अस्ति युक्तं पदे वेति गावोस्यानन्तराः समीपा वेत्यादौ नम
तञ्च अनन्तरमव्यवहितं समीपं तु व्यवहितमपीति भेदः न तु केवलानामनन्तरादीनामस्त्वव्यवच्छेदः गावो
स्य सन्त्यनन्तराः समीपा वेत्यादेस्तु कथं व्याहृतिः सन्नामसद्भावात् मैवं प्रत्ययार्थेनोपनभावयितुं शक्यप्रकृत्यर्थोः
पाधेरुपाधिकान्प्रत्ययः स्वस्वामिभावस्य सत्ताद्यान्तर्भावयितुं शक्यत्वेपि गोमानिति प्रत्ययार्थेन प्रकृत्यर्था
न्तर्भावो यदि तु मशकानां नाडीशार्थविवक्षा व्याख्या उक्तवाक्यस्यैव प्रयोगात् अनेनतरादिपदस्य सत्यकप्रयोगे
तदन्वयसाकाङ्क्षत्वान्नाशङ्कनीयासमर्थतया मत्वर्थोत्पत्तेः न तु यथासक्तिग्रहणासमर्थे असामर्थ्यादनन्तरादिषु न
प्रत्ययप्रवेश तदभावेपि असामर्थ्यादेव प्रत्ययवारणमस्तु किं तेनेति चेत् मैवं अस्तिग्रहणस्य तेषु केवलान्नत्वर्थप
द्योपाधित्वेन प्रत्ययात्तदन्तर्भवति न त्वानन्तर्यादिविशिष्टमिति सूत्राव्येनानन्तर्यस्यानन्तर्यादेः प्रतीत्यर्थं तत्पदे प्रयु
ज्यमाने भवत्यसामर्थ्यं अस्तीत्यनुपादानेतद्धर्मान्तरावच्छिन्नस्यास्यत्वस्यार्थस्य प्रत्ययात्तदुपाधित्वेनान्तर्भावे सम
वे गोमानित्यनावृत्तेवानन्तर्यप्रतीतिसम्भवादनन्तरादिपदप्रयोगानावश्यकत्वात्सामर्थ्यं दुर्लभं स्यात् अथ
चित्रगावोस्य सन्तीत्यत्र मतुप् स्यात् मैवं अवयवार्थापत्तिः समुदायार्थो वा नाद्यः गोपदस्य चित्रापदसाकाङ्क्षत्वात्
नान्त्यः पदद्वयस्य प्रातिपदिकत्वाभावात् अथवास्तु समुदायः प्रत्ययग्रहणस्य नियमार्थत्वात् प्रातिपदिकसमु
दायस्यार्थान्तरानभिधायकत्वात् पदावस्थायामेव विशेषणस्य विशेष्यभावरूपविशिष्टार्थसम्पत्त्या प्रातिपदिक
समुदायः तदभावात् सुवन्तानाङ्घिटोत्पन्नावपि तयोः सुवन्तत्वाभावात् प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्त
दन्तस्य च ग्रहणात् न च सुवन्तस्य विधीयमानः समासो यथा सर्वस्य न तु कस्यचिदेवैकस्य तथा प्रातिपदिकसमु
दायादपि प्रत्ययः स्यात् नानो विधीयमानानां कार्याणां व्याक्रियान्तस्त्या विशेषमनपेक्ष्यैव प्रवृत्तेरिति वाच्यम् प्रा
प्रातिपदिकादि[illegible]कवचनान्नानां समाहारनिर्देशादेकस्मादेव प्रातिपदिकाद्प्रत्ययेन उद्देश्यतावच्छेद
[illegible]नाहि[illegible]

पं. कथमस्य यावतीति नत्रापि स्तावन्मात्रात्प्रत्ययोत्पत्तेः समुदायस्य च प्रातिपदिकत्वपर्यालोचनाप्रयत्नात् नचैवम
सि. म. पि चित्रगुशब्दस्य समासप्रातिपदिकत्वान्मतुप्प्रसंगः बहुव्रीहिणैव तदर्थस्य बाधितत्वात् चित्रागावोऽस्य
५१ चित्रागावोऽस्य सन्तीत्यनयोस्तुल्यार्थत्वात् स्यादेतत् पंचगुर्देवदत्त इत्यस्मात्समासान्मतुप्स्यात् नच बहुव्रीहि
51 त्वसामर्थ्यादुत्पत्तिमादिनेषेधः शंकेति वाच्यं अस्य द्विगुत्वात् द्विगुना चोक्तेऽप्यर्थे तद्धितोत्पत्तेर्दृश्यमानत्वात् तद्धिता
र्थोत्तरपदे इत्यत्र स्यात् दृष्टकार्यशब्दोपादानात् द्विगोर्लुगनपत्ये इति लुग्विधानसामर्थ्याच्च नवायमपि बहुव्री
हिः पंचगुरित्यादावसंख्येयासावकाशात् संख्योपात्तद्धितार्थे पंचगुरित्यादौ विधीयमानस्य द्विगोर्विशेष
विषयत्वात् अथ बहुव्रीहिर्वैतद्वेगः अस्येति षष्ठ्यर्थमात्रापेक्षत्वात् द्विगोश्च अस्तीत्यर्थोऽविशिष्टषष्ठ्यर्थसापे
क्षत्वात् तदस्यास्तीति षष्ठ्यर्थे नस्यात् न तद्धितविधावुपात्तत्वात् नचानन्तर्यादप्यनवकाशो बलवदिति द्विगुरेव मपि
दुर्बल इति वाच्यं द्विगुबहुव्रीह्योरपेक्षसाम्येऽपि तस्याल्पप्रत्यासत्त्यर्थस्याधिकस्यापेक्षणीयत्वात् बहुव्रीहिर्द्विगुना
बाधे बीजाभावादिति चेत्सत्यं मतुब्विधावपि अस्तीत्युपादाने बीजाभावात् नचानन्तर्यादावपि मतुब्व्याप्तिः
बहुव्रीहेरपि तदर्थे प्रसक्त्या तत्रास्तीति ग्रहणस्य कर्तव्यत्वप्रसंगात् नचतनाभावेऽप्यनभिधानादेवातिप्रसंग
निवारणस्य चोभयत्रापि समत्वात् किंचात्रास्तिग्रहणं न प्रकृत्यर्थोपाधिरपि तु तत्त्वम् पंचमीकः प्रकृतिनि
र्देशः अस्तिमानित्यत्र अस्तीति तिङन्तात्मतुब्विधानार्थः अन्यथा प्रातिपदिकत्वाभावान्नस्यात् नचास्तित्वमि
ति प्रयोगदर्शनात् कर्तृविशिष्टसत्तावाचकमस्तीति तिङन्तप्रतिरूपकमव्ययं तत्तस्य च प्रातिपदिकत्वादेव
सिद्धमिति वाच्यं तथापि व्यभिचाराभावादस्तेर्वास्तिसामानाधिकरण्यानुपपत्तेः वृत्तिविषयेऽस्तिशब्दस्याः
स्तिक्रियासाधनदेशादिरूपकर्तृविशेषवृत्तित्वात् कर्तृसामान्येन प्रत्ययार्थविशेषणानुपपत्तेः तस्मादुपा
धेरस्त्यर्थस्यानुपादाने पिशाचाशानिस्वभावादेवास्त्युपाधिकार्थवृत्तित्वात् बहुव्रीहेरपेक्षया द्विगोरपेक्षणी गें.
याधिक्याभावेनानन्तर्यबहिरंगभावाभावात्पंचगुरित्यादौ न तद्धितार्थद्विगोर्विवक्षस्तेनङन्तव्याघ्राणमात् ५१

इत्यादिवदुक्तार्थस्याधितद्धितस्यापत्तिर्दुर्वारेति द्विगोस्तद्धितप्रतिषेधो वक्तव्यः इति पूर्वपक्षः सिद्धान्त
द्धितार्थेति सूत्रे सर्वत्र मत्वर्थे प्रतिषेध इति वचनस्याबहुत्वाद्बहुव्रीहेरपि मत्वर्थत्वादयं द्विगोरेव न भवति
किन्तु बहुव्रीहेरेवेति नात्र वचनान्तरमारम्भणीयं बहुव्रीहिं समस्तार्थात्तद्धितप्रसक्तेरेवाभावात् तेन पञ्चगु
रित्यादौ पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं न तु द्विगुनिबन्धनमन्तोदात्तत्वं अव्यक्तैरेवोक्तम् अत्र वार्तिक
शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः सरूपप्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते समानशब्दाविति वच
नात्र यत्र पूर्वो मत्वर्थीयः षष्ठीसमर्थप्रवृत्तिस्तत्रैव तदन्तात् षष्ठीसमर्थान्न मत्वर्थीयः एवं सप्तमीसमर्थोऽपि किन्तु
पूर्वस्य षष्ठीसमर्थत्वे द्वितीयः सप्तमीसमर्थः पूर्वस्य सप्तमीसमर्थत्वे तु द्वितीयः षष्ठीसमर्थः द्वितीयश्चाविरू
प एव न तु पूर्वेण सरूपः सरूपस्तु वृत्तिभेदेऽपि न भवति इति फलितार्थः न च मत्वर्थीयात् तान्मत्वर्थीयस्य प्रसक्तिरेव।
वनाख्यकेनैव तदर्थप्रतीतेः यवा मतो यस्य सन्ति तस्य यवाजामपि सत्त्वादिति वाच्यं यस्य स्वस्वामिसंबन्धेन य
वाः सन्ति तस्य यवमत्त्वदार्थत्वेन तत्संयोगिनस्तेन संबन्धेन यवानामसत्त्वात् एवमस्वामिनस्तदीययवस्वामि
त्वाभावाच्च दण्डमस्यास्तीति दण्डी सोऽस्त्यस्यां शालायामिति दण्डिमती शाला अत्र दण्डिपदं षष्ठीसमर्थोत्पन्नेति।
प्रत्ययान्तं तस्मात्सप्तमीसमर्थान्मतुप् न तु षष्ठीसमर्थात् समानवृत्तित्वात् इति वपि न भवति सरूपत्वात्
अथ हस्तिपदस्य षष्ठ्यर्थवृत्तित्वात्तस्मात् षष्ठ्यर्थवृत्तित्वमतुबभावे हस्तिमान् राजेति न स्यात् मैवं हस्तिश
ब्दात् तेनैव प्रवृत्तिनिमित्ततया संबन्धस्यावगतत्वात् अत एवाऽहस्तीति मत्वर्थीयो योऽन्तरमेव नञ्समासो न त्व
हस्त इति बहुव्रीहिः ततो ज्ञातिपर्युदासाऽन्वबोधात् समानार्थकत्वेन मत्वर्थस्याधित्वा बहुव्रीहिरेव
अगवनस्य इति न तु गोमानित्यादि अत्र दण्डी अत्र वामीत्यादौ तद्दण्डसंयुक्तसंयोगानिषेधस्य सम्यगभानमित्यति
षेधस्य च मत्वर्थीयो न रनञ्समासं विनानवगमाद्वैषम्यं अदण्ड इत्यत्र उत्सर्गतो दण्डसंयोगनिषेधस्य अवा
गित्यतो वाग्मि[illegible] एवच प्रतीतेः शिष्टसमक्षे व्याख्यातम् वार्तिकान्तरमप्यत्र भूमनिन्दाप्रशंसासु नित्ययो

पं. सि. सू. ४२

...वति तत्रापि

गेतिशायने संसर्गेस्तिविवक्षायांभवन्तिमतुबादयः अस्तिविवक्षायांयेमतुबादयस्तेभूमादिषुप्रायशोभ
वन्तीतितदर्थः इतिशाब्दलभ्यविषयविशेषस्फुटीकरणार्थंवेद बहुत्वंप्रायेणास्वस्वामिसम्बन्धादौसंयोगा
दौदण्डीत्यादेरेकेनाप्युपपत्तेः तच्चनिष्किकवशाद्विभिरेवग्राह्यं राज्ञोबहुभिरपिगोभिरप्यनिर्वाहादस्य
ण्यावत्तराद्विभिरपिनिर्वाहात् गोमान् यवमान् यवमतीभिरद्भिर्यूपंप्रोक्षतीत्यादौसंस्कारस्यादृष्टार्थत्वात्तना
तीयसंयोगेनैवतदुपपत्तेर्नबहुत्वविवक्षा संवादकौ कडुरावर्ती संवादकशाह्नोदशनवाची तद्योगस्यसाधा
रणयान्निंदाप्रतीतिः रूपवानित्यत्ररूपस्यचाक्षुष्यमात्रवृत्तित्वात्प्राशस्त्यं तच्चैवैवक्तिकं नहिकार्यानिमि
त्तेनाश्रीयतइत्यत्रकार्यभाक्त्वरूपस्यतस्योक्तत्वात् क्षीरिणोवृक्षाइत्यत्रनित्ययोगबाधः किंचित् क्षीरयोग
स्यसर्वत्रसत्त्वात् एवंउदरिणीत्यादौयोज्यम् दंडीछत्रीत्यादौगृहावस्थितेदण्डस्यानवगमात् एवंउदरिणीत्या
दौयोज्यम् तत्संयोगवतः प्रतीतिश्चसंसर्गेइत्युक्तं अन्यथाभूमादावपिसंसर्गप्रतीतेरविशेषात् गुणवचनेभ्यो
मतुपोलुग्विषयः शुक्लः पटः कृष्णोघटः नतुगुणगुणिनो सोयमित्यभिसंबंधात्भेदव्यवसायात्मतुपस्त्व
त्पत्तिरेवनास्तीतिवाच्यं उपायापायिनोगुणानांव्यक्तिभेदादुपपत्तेः शुक्लः पटः पटस्यशुक्लइतिसामाना
धिकरण्यवैयधिकरण्ययोर्दर्शनात् गौः शावलेयइत्यादौजातिव्यक्त्योःसामानाधिकरण्यमात्रबोधात्
शावलेयस्यगौरितिवैयधिकरण्याभावात् अतएवाश्रयतोलिंगसंख्यानुविधानंशुक्लंवस्त्रं शुक्लःशाटी
शुक्लः कंबलः शुक्लौकंबलावित्यादि अन्यथापाञ्चालादिवत्स्वाभाव्यान्नियतलिंगसंख्यात्वेसर्वत्रसर्वलि
गंसंख्यात्ववासस्यात् तदुक्तं तथाचलिंगवचनसिद्धेरिति अतएवाःसंरोणोक्तं गणोशुक्लादयःपुंसिगुणिलिंगास्तु
तद्वतीति तद्वतीत्येनगुणगुणिनोरभेदात्तस्यनिरासः शुक्लःपटइत्यादौअत्रभवस्यशुक्लाश्रयाभेदोविषयः
नतुशुक्लाभेदइतितत्तोलाभात् नचपटेशुक्लइत्यादिप्रतीत्याशुक्लत्वरूपेणाभेदस्यापिस्वीकारादभेदेपिनवि
रोधइतिवाच्यं एकरूपेणाभेदाभेदयोरनुपपत्तेः नचशुक्लःपटःपटस्यशुक्लइत्युभयप्रतीतेरेकरूपेणव

गं ४२

तत्स्वीकारः इति वाच्यं इदं रजतं शुक्तिर्न रजतमिति प्रतीतिभ्यां शुक्तावपि रजतभेदाभेदयोरङ्गीकारप्रसंगात्
शुक्तित्वधर्मितावच्छेदकीकृत्य न रजताभेदप्रतीतिरिति चेत् किं ततः इदं नेनैवोभयापेक्षस्तथाप्यविरोधा-
त् विरुद्धप्रत्यययोरन्यतरस्य भ्रमत्वकल्पनाया आवश्यकत्वात् पटः शुक्ल इति प्रतीतेस्तैरङ्गीकाराच्च
आधाराधेयभावप्रतीतिस्तु कारणतादिमतवासवा विलास इत्यद्वैतवव्छिकाकारैकक्रान्तत्वात् यत्तु भेदस्य
मानाधिकरण्यमेव सर्वत्र संसर्गो भासते प्रत्यक्षात् घटो घट इति मिथ्याप्रसंगात् तथा च शुक्लो घट इत्यत्र गु-
णगुणिनोरभेदस्य भेदसामानाधिकरण्यमावश्यकमिति भेदाभेदस्वीकार इति तच्चिन्त्यं घटप्रति-
योगिकस्याभावभेदस्य घटेपि सत्वात् न च विशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदः एकत्रेष्य-
मिति तात्पर्यबोधे विशेष्यतावच्छेदकाभावात् नापि विशेषणतावच्छेदकावच्छिन्नप्रतियोगिताकः वि-
शेष्ये विशेषणमिति रीत्या बोधे विशेषणतावच्छेदकाभावात् तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेद-
स्यापि शाब्दानुगममात्रत्वात् प्रथमामात्रेण तथा नियमस्य वक्तुमशक्यत्वात् घटाभावे घटाभावः प्रमेय-
त्वे प्रमेयत्वमित्यादौ च तस्यापि दुर्वचत्वात् घटो नीलघटो इत्यादौ तदभावाच्चान्यत्वत्र विस्त-
रः प्रपञ्चैकिकाराः विद्यमानस्य संबंधो मत्वर्थो न त्वविद्यमानः संबंधः प्रतीत्यस्य तादित्यनेनैवान्व-
यात् संबंधविशिष्टेऽस्तित्वान्वयात् संबंधेपि तद्वत्तया विशेष्यान्वितान्वयिनो विशेषणत्वादित्युक्ता-
वपि विशेषणत्वस्यौत्सर्गिकत्वात्तथाऽन्यथा संबंधोपलक्षितप्रवास्तित्वान्वयसंभवात् अस्मिन्नस्ती-
त्यर्थके मतुपि नाहशरीनिर्दुर्वचत्वाच्च अस्येति षष्ठ्याः कारकविभक्तित्वाभावात् इत्यनेनान्वयेपि अ-
स्मिन्निति सप्तम्यर्थस्य तदसंभवात् कारकविभक्तित्वादस्तीति क्रियायामेव तदन्वयात् तथा चाधा-
रभावस्य मत्वर्थस्य कादाचित्कत्वेपि तात्पर्यार्थस्यास्ति विद्यमानत्वमादायैवमन्तरुपपत्तिः अत एव गवांभू-
तमभविष्यदिति प्यकरू न्मिति न भवतीति भाषाहारतर्क्के वस्तुतः संबंधमात्रे मतुप्रमन्तु वस्त्यर्थ इति स्त्रे

पं.
सि.खं.
५२
४३

एतत्तथात्वस्यैति ने मोत्रेन क्रियान्वयात् देवदत्तः पचतीत्यादेः साधुताया भाष्यादिसिद्धत्वाच्च मतुपाच न
सर्वत्र प्रातिपदिकार्थस्य वर्तमानत्वं तदधिकरणत्वं वा बोध्यते अयं घटो विनाशीत्यादिव्यवहारा
दिति प्रमाणलक्षणोदीधितिकारेण क्तत्वाच्च न च धात्वर्थसंबंधे प्रत्ययाः इति निर्वाहः भाविकृत्यमासी
दित्यादावनुपपत्तेस्तत्रैवोक्तत्वात् देशो प्रधानत्वाद्दर्शी गच्छतीत्यादौ टत्रविशिष्टे प्रेषात्तु वचनाद्य
न्वयात् उभयोरेककालीनत्वलाभो विशिष्टे वैशिष्ट्यान्वयस्यौत्सर्गिकत्वात् इत्याहुः यद्यपि संबंधो म
तुबर्थो नत्तसंबंधः तस्य नामार्थेन यावन्नवाचा प्रत्ययसंबंधेनान्वयानुपपत्तेः संबंधिनस्तथात्वे तु भे
देनान्वयोपपत्तेः तथापि मतुबर्थेनावच्छेदकत्वमेव तत्र मतुबर्थत्वमित्युक्तेः अतएवावयवग्रंथे पर्व
तो वह्निमानित्यत्राभेदेन तदन्वयः पर्वतो वह्निमान्नवेति विप्रतिपत्तिवाक्येपि वह्निमत्तस्तादात्म्येन व
ह्निमद्भेदस्य च विशेषणताविशेषसंबंधेन पर्वते बोधयत्विति दीधित्यादावुक्तेः यत्तु मतुबर्थः संसर्गो
न तथैव भासते न तु प्रकारतया पर्वतो वह्निमानिति शाब्दबोधाद्वह्निसंदेहनिवृत्त्यनुपपत्तेरिति त
च्चिन्त्यम् वह्नेर्नामार्थतया पर्वतादौ भेदसंबंधेनान्वयानर्हत्वात् तत्र प्रकारीभूतविभक्त्यर्थसंबं
धेन घटादेर्भूतले प्रकारीभूतनिपातार्थसंबंधेनेवाहादिपदार्थस्य च मूर्खादौ चान्वयवत् अत्रापि प्रका
रीभूतमत्वर्थसंबंधेनान्वयः स्यादिति वाच्यं संयोगिवह्न्यभावः पर्वत इति शाब्दस्वीकारेपि वह्निसंयोग
तदभावोभयप्रकारकसंशयनिवृत्तेरनुपपत्तिप्रसक्तात् भिन्नप्रकारकस्यापि निर्णयस्य प्रतिबंधकत्व
स्वीकारेण वह्निसंयोगिप्रकारकनिश्चयस्यापि वह्नितदभावप्रकारकसंशयनिवर्तकत्वसंभवात्
इति दिक् रसादिभ्यश्च मतुप् स्यात् प्रत्ययांतवृत्तिनिष्ठस्य पूर्वप्रातिभः रसवान् रूपवान् रस रूप गंध स्पर्श शब्द
भावस्नेह गुणात् प्रकारः रसवान् गुणादिति रसादिविशेषणं तथा च मधुरादिशुक्लादिवाचकान्योर
सादिपदेभ्यः प्रत्ययांतवृत्तिनिष्ठानेन्नाभावविशेषणाभावादिति वचनभ्यः तेन रूपिणी कन्या रसिको नट इत्या

दिसिद्धं प्रकाचोपग्रहणं इत्यादि निहन्त्यर्थं भाष्यकारास्त्वाहुः शोभाविशेषोपि स्त्रियवद्गर्योऽस्य रूपामक
प्रवनथ्योचार्वश्री वैदूपिरायस्मरसामित्यादिविरोधः स्वाश्रिकोवाउशिरवत्र ग्रणादमिवनो दर्शनाद्वा
नियमार्थत्वाद्योगान्न कर्तव्यमेवदमित्याहुः पनेन स्पर्शाववनाश्चर्ज्वलिनेचनेजू इतिवामनप्रराणाम
पिवाद्याने प्राणिस्यादानेलजन्यनस्थ्या चूडालः चूडावान् प्राणिपदमात्रलोकप्रसिद्धशरीरा।
दिस्मिन्नानपरं तेनचैतत्यापगमेपि प्राणिव्यवहारस्य चूडत्वान्कस्मनावस्थायामपि चूडालादिप्रयोग
इतिकैयटः प्राणंपूर्णादितिवक्तव्यं नेहचिकीर्षावान् निडीर्योवान् अनभिधानादेवासूनाभिधसंगश
तिभाष्यं प्राणास्यात्किंचूडावान्हेतुः चूडस्यप्राणित्वेपिलोके शरीरव्यवहाराभावात् शिखावान्तोय
इतिलन प्रत्युदाहरणं व्रीह्यादिषुपाठाल्लप्रसक्त्यभावात् स्तनाभ्यामानग्रकुटिलशाखी चूडाल
मुकुटमितिमोत्स्यर्थेलहरी प्रयोगउपचारात् आतः किंहस्तवान् नवप्रत्ययस्वरेणोवोनोदान्तसिद्धा
तिन्नैवयथ्यं चूडालोसीत्यादौ स्वरितोवानुदात्तपदादावित्येकदेश निमित्तसिध्यनिष्ठावर्मासित्या
दीनिस्वरितत्वबाधनार्थत्वात् सिध्मादिभ्यश्च सिध्मलः सिध्मवान् स्यादेतत् अत्रगणेपान्यका
रान्नानिपदानि तेभ्योलजभावपदे प्रत इतिठनाविधेयनत्वप्रसंगः एवेशब्देत्याकारांतेभ्यस्तदप्रसे
गान्नदोसावशंका उच्यते अन्यतरस्याग्रहणमत्रसमुच्चयार्थे निपातानामनेकार्थत्वात् समु
च्चैनत्वश्चमतवदप्रकृतत्वात् यद्वा विकल्पपदेपि लक्षोः अपृथ्वोमपवेवनत्विल्यादयः तथापि तुंदा
दिभ्यइत्यत्रइलजिनिठनोमतुप्चेतिचत्वारः प्रत्ययाइष्यन्ते अन्यतरस्याग्रहणाद्वहस्त्यापिच्छादिभ्योविप्रत्य
यवत्वप्रयस्यप्रमाणत्वेततुंदादिपिच्छादीनामन्यतरात तभावंकृतार्थेतुंदादिभ्य इतिवाएकमेवसूत्रंकुर्यात् न
तुंदादिभ्योनकर्तनभ्योपि इतिठनाविध्येत पिच्छादीनां तुंदादिपाठापिच्छादिभ्यइतिठनोस्यातां पिच्छादि
षुतुंदादिपाठेणान् पिच्छादिभ्योनकारांतेभ्यस्तोनस्यातां तत्कथं सूत्रभेदोसावपक इमिदत्सत्यं प्रकारांतानामे
षुतुंदादिभ्यः प्रत्ययातिः

पं.
सिद्ध.
४४

षोभयत्रावभाति त्यत्वापकत्वोपपत्तेः किंच अत्रत्यस्यान्यतरस्यांग्रहणस्य विकल्पार्थत्वे केशाद्व इत्यत्र
तद्ग्रहणं व्यर्थं स्यात् तावतैव प्रत्ययाभावपक्षे इति ठनोः सिद्धेः अतोऽत्रत्यस्यान्यतरस्यांग्रहणस्य मतुप्समु
च्चयार्थत्वे तेन तत्राप्यते तथा चैतदनुवृत्त्या विनिठनोरसिद्धेर्भवति विकल्पार्थकत्वात् तत्रान्यतरस्यांग्रहणस्य सा
र्थक्यमिति सिध्मप्रादिरातिवाज हस्त पाद हनु सक्तुमांसपरशु पार्ष्णिधमन्योर्दीर्घश्च पार्ष्णीलः धमनीलः
वातदन्तबलललाटानामूङ्च ऊ।त्वादन्तादेशः यत्तु बलाद्बलः इत्युक्तं तन्न मध्योदात्तप्रसंगात् न चेष्टापत्तिः
गणसूत्रप्रामाण्यादन्तोदात्तस्येष्टत्वात् जटाघाटाकालाः क्षेपे जटाल इत्यादि क्षेपे किं जटावान् स्वरूप क
थनेनात्मार्थे च दक्षेत्रूपतापाच्च पूकालः मातिकालः उपतापो रोगः विचर्चिकालः विपादिकालः आदितेभ्यप
व नेह ईर्ष्यावान् कासवान् वत्सांसाभ्यां कामबले कामबलशब्दौ तद्वत्परौ वत्सलः स्नेहवान् अंसलो बलवान्
वृत्तौ वत्सांसयोः स्नेहवत्त्वबोधकत्वम् इह मतुप्समुच्चयप्रकरणेऽपि स नेष्यते उक्तार्थयोस्तदन्तादप्रतीतेः वत्सव
तीत्यप्रयोगो ऽंसवानित्यत्र दुर्बलस्येव प्रतीतेः फेनादिलच्च चकारो लच्समुच्चयार्थः अन्यतरस्यांग्रहणस्य मतुप्
समुच्चयार्थं सर्वत्रानुवृत्तेर्बोध्या फेनिलः फेनवान् लोमादिपामादिपिच्छादिभ्यः शनेलचः इहान्यमेवादिग्र
हणानुवृत्तेर्यथादिसूत्रवदनुवृत्त्याणादिसूत्रे प्रातिपदिकाणादिवच्चोदनान्यस्य सर्वान्वयदिति संभवादिति दीक्षिताः
लोमादिभ्यः शः लोमशः पक्षे लोमवानित्यादि लोमन् बभ्रु वल्गु हरि कपि तरु तनि लोमादिः पामादिभ्यो
नः पामनः पामन् वामन् हेमन् श्लेष्मन् बाहु तनु वलि सामन् अंग कल्याणे कल्याणानि अंगानि संत्यस्याः
अंगना शाकीपलालीदद्र्वा ह्रस्वत्वं च महत्त्वशाके नानाजातीयशाकसमाहारो वा शाकी पलालदद्रोर्दाद्र्यवा
भिन्नानि शालिकोद्रवादिपलालानि पलालीति कयटः शाकिनेयं पलालिनं दरिद्रातेर्यालोपश्चेति दद्रू
शाह्वणादिः इकाराकारयोर्लोपः प्रत्ययश्चेति तदर्थः दद्रूस्त्वग्रोगविशेषोस्यास्तीति दद्रुणः विष्वगित्युत्तरपदे
लोपश्चाकृतसंधेः नप्रत्ययः अकृतसंधेरेवात्र पदलोपश्चेत्यर्थः विष्वगानाश्चलतीति विष्वं विविषमनानीः

गें.
४४

र्थः नान्यस्य सन्तीति विषुणाः विषुवदाख्येः कालः तस्य हि नानागतानि दिनानि सन्तीति दिवसानां तयोर्न्यूनाधि
कभावस्य तदाश्रयत्वात् नायुर्मेत्यत्र व्यवस्थितप्रकृतिर्मत्वर्थे अनिष्टविषुणः वृत्तिविषये विषुमामनक्रियान्तभा
वाद्विषयमनमस्यास्तीत्येवं वाक्यादेवाभिधानमित्याहुरिति कैयटः यणादेशोऽत्र यत्नवपदलोपे विषुणाः इति
स्यात् श्रतोऽकृतसंधेविग्रहं समर्थानामिति सूत्रे कृतसंधेस्तद्धितोत्पत्तिविग्रहं कृत्वा तदपवादोयम् लक्ष्म्याश्च
च लक्ष्मीरस्यास्तीति लक्ष्मणः इति पामादि पिच्छादिभ्य इलच् पिच्छिलः पिच्छ उरस् ध्रुवक जटाघाटा कालाः
त् देशे जटिलः घाटिलः कालिलः देशे किं अन्यत्र जटावानित्यादि प्रज्ञा उदक श्रद्धा पिच्छादिः प्रज्ञाश्रद्धा
र्चाभ्यो णः प्रज्ञानं प्रज्ञा सास्यास्तीति प्राज्ञो व्याकरणे गुणभूतया क्रियया व्याकरणादीनां कर्मत्वेन संबंधात् वि
षयत्वविवक्षायां तत्प्राज्ञो व्याकरणे इति कैयटः नत्वाधेयकर्तृत्वप्रसक्तिः कुतूहलं ज्ञाड्डिनयोगे तदग्रहणेः कृत
श्रद्धीकर्मित्यादिवत् प्राज्ञश्राद्धार्चाभ्यो णप्रत्येवं तद्धीविशेषवाविति स्त्रियां परे विशेषः वृत्तेश्चानिवक्तव्य
वार्ताः वृत्तिश्राद्धो निष्ठिवृत्तिविधानादिवृत्तिरिति कैयटः वृत्तिकृतानवृत्तिश्राद्धः सूत्रेऽप्रदिष्टः तपःसहस्राभ्यां
विनीनी इकारोऽनकारवपविज्ञानार्थः तपस्वी सहस्री नत्वनयोरसंतत्वाददन्तत्वाच्च लक्षणेन ठेणा विनीनोऽसि
द्धावेवेति वैत्मत्यं वक्ष्यमाणेनाणा विनेर्बाधापत्तेः विधानसामर्थ्याच्च तदभावात् द्वितीयादण्येतत्त्वलक्ष
णस्य ठेनाबाधार्थत्वात् अण्च योगविभाग उत्तरार्थः तापसः साहस्रः ज्योत्स्नादीनामुपसंख्यानं ज्योत्स्नः तामि
स्रः तमः अपूर्वहल्लमिति तद्युक्ता रात्रिरयं ज्योत्स्नेत्यभिधानात् विशेषप्रयोगाः स्तित्वविहितमिति कैयटः कौण्डलः कुण्डलादिभ्याः कौत
पः वैपादिकः सिकताशर्कराभ्यां च अण्प्रत्ययान् सैकतः सैकतः शार्करमधु श्रादेशार्थमेतत् देशे लुबिलचौ च सि
कताशर्कराभ्यां मत्वर्थीयस्य लुक्स्यादिलजन्म मतुपश्च देशेऽभिधेये सिकताः सन्त्यत्र सिकता सिकतिलः सैकतः
सिकतावान् चैतेषु एवं शार्करा इत्यादि तथा चाऽमरः स्त्री शर्करा शार्करिलः शार्करः शार्करावति देश एवादि
मावेवमुत्तरेयाः ... वति दन्तशिखात् उत्तनादन्ताः सन्त्यस्य दन्तुरः तुङ्गनाभिर्वचेदकप्रकरदेत्वरामेदिनी

पं.
मिस्र·
४५
45

स्यादात्रुपचारो रोगतिन्न दुष्टानि विगुणकमयोरः कुब्जा वक्रांसकः संन्यकुब्जः स्त्रियां दिक्षितदृक् स्वस्थ ग्रेवपामपशिरित्य
मरः तथा च मालिविजनपूर्खित्रि इत्यत दन्तस्फुर्वा वा वृक्कः गात्रे गात्रीं दिन्ने वा घविषा वे माधिरं चित्रं इति शाश्वतः श्रुतपवमू
र्धं स्वशिरा मि वेत्यत्रापि भेदोपचारव्याख्याने चिंत्यमिति यस्य भार्या कौलटेयभक्तः शुष्कोऽङ्कोषोन्नुषणमित्यमरः
शुक्रः मधुमाधुर्यं तद्धान्मधुरः यद्यपि माधिकमाधीकद्वयएक द्रव्यमपि पदस्यार्थस्तथापीह रसवाचिनपवग्रह
णं मधुन्यपि मधुरपदप्रयोगात् रसार्थकमधुशब्दात्मत्वपि नास्त्यनभिधानादिति कैयटः शृङ्गानिःपन्निर
कावर्णमहत्वं कठविवर्णं वितदस्यास्ति वेगादंभः त्वगत्वंङ्कजन्मेष्यानगर्पाम्नुपाडुम्ब्यश्वीपसंख्याने ङ्गुलवः स्वव्या
पोवशाद्दोद्वावतोः प्रतिबंधेपुवमस्येत्यर्थः कुंजरो हस्ती कुंजशब्दोऽन्नि विषये हस्तिहनुवाची नगाहूलाः प
र्वतास्थनद्वन्नगरे जातिशब्दो येन गशब्दस्याश्मादिगणेपाठाद्बुध्रणादित्वेन प्रत्यये सिद्धेर्नगाद्वेति न वक्त
व्यमिति कैयटः पामनो ज्वरमस्ति पामरः पामत्वपादमिति भाष्यं पांडुः शुक्लो वर्णः तद्वान्पाडुरोगवटः वर्णवाचीपा
डुवशाद्वन्नुत्पन्नः हरिणः पाण्डुरः पाण्डुरित्यमरोक्तेः कच्छांडुसर्वत्र वक्तव्य कच्छूरस्य रोगविशेषः कच्छुरोस्यः
कुट्टयोऽमः श्रोत्रस्यास्ति प्रमः टिवडदिसर्वं केचित्प्रवृशब्दोऽदिनवाचीप्रकृत्युत्पन्नप्रत्ययः उकारान्त इत्याहुः डुबलोऽज
नकत्वसंबंधेनास्त्यस्येति द्रुमः पलाशीद्रुद्रुमागमाः इत्यमरः वत्सतोऽपशब्दो धर्ममात्रपर इति वोध्यं संज्ञायाखे
शुमतपोन मतुब्वयः जातिविशेषस्य मतवत्वादप्रतीतेः केशाद्वोऽन्यतरस्याम् केशवः पन्ने इनि ठनौ केशी केशिकः
मतुपि केशवान् अन्येभ्योऽपि दृश्यत इति वक्तव्यं मणिवो नागविशेषः हिरण्यवो निधिविशेषः कुंजव इत्यन्ये छ
न्दसीवनिपौ वक्तव्यौ रथीवभूत्संकुलानीगविष्टो समङ्गलीविंयवमूक् कर्मधारयोऽत्रंभत्वर्थीयप्रत्ययः लावबा
हुव्रीहिश्चेति नित्यनास्तिबोद्धव्यमत्वात् ऋतावानं मघवानमीमहे ऋतंयस्यास्तीति ऋतावान् मघमस्यास्ति मघ
वा मतुपि तु मघवत्वं मघवाबहुलमिति न कर्तव्यं श्वनुक्ष्विति निपातनेनान मतुपा च भाष्यामपिप्रयादृश्य
स्यासिद्धत्वात् उद्गाव उद्गतीव उद्गतमस्यास्तीति ससाधनक्रियावचनादुपसर्गात्प्रत्ययः अर्ग्यासोलोपश्चवाच्यः

अर्णोस्यास्त्यर्णोवः अर्णोर्णस्तोयपानीयेत्यमरः मेधारथाभ्यां इरन्निरचौ वक्तव्यौ मेधिरो रथिरः इदमपि
छन्दोविषयमितिकैय्यटः विवावं कुरबावं इष्टकावं अन्येभ्योपिदृश्यत इतिदीर्घः गांड्यजगात्संज्ञायां
गाण्डाजगस्यदीर्घघोस्तंत्रेणनिर्देशः गाण्डिवं धनुर्विशेषः गाण्डीवंवा अजगवन्तद्धनुः काण्डाण्डादीरन्नीरचौ का
ण्डीरः आण्डीरः रजःकृष्यासुतिपरिषदो वलच् रजस्वलः सांतत्वादृत्संज्ञा कृषीवलः आसुतिरभिषवः आसु
तीवलः वलेइतिदीर्घः परिषद्वलः पर्षादिनिपाठे पर्षद्वलः पर्षद्वला महाब्रह्मैरितिमाघः समज्यापरि
षत्पर्षदितिचइकोषः अन्येभ्योपिदृश्यते भ्रातृवलः वलेइत्यत्र अणइत्यनुवृत्तेर्नदीर्घः पुत्रवलइत्यादे
त्र वनगिर्योरितिसूत्रसंज्ञायामित्यत्रसूत्रे संज्ञायानु पुत्रावलवंस्तगावलः दन्तशिखात्संज्ञायां समा
हावहः दन्तावलो हस्ती शिखावलो मयूरः ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमली
मसाः मत्वर्थे निपात्यन्ते ज्योतिषा इकारवलोपौ नञ्प्रत्ययः ज्योतिरस्त्यत्र ज्योत्स्ना चंद्रप्रभायामवयवाना
मपिज्योतिष्ट्वात् नमसाकारस्य इत्वं वृश्च नमांसि संत्यत्र नमित्वं नमः समूहः इत्याप्नवं नमइतिपदेपूर्ववत्
आलोकसामान्याभाव इतिपदे विशेषाभावानामेवाऽवयवत्वोपचारः अयंनविशेषः अतिरिक्तसामान्या
भावपदेसामानाधिकरण्यसंबंधेन विशेषाभाववत्त्वं विशेषाभावकूटप्रतियोगितावच्छेदकं सामान्य
मितिपदेनतद्यथोक्तैवरीतिः नमिस्रंतमिरंनम इत्यादेरेकत्वसमूहसमूहिनोरभेदोपचारात् नमित्वातिस्रो
त्वमनेन व्याख्यानात् शृंगाण्यस्यसंतिशृंगिणः ऊर्जस्विन् गोमिन् इत्यत्र नलोपाभावो नान्तत्वाभिव्यक्त्यर्थः
ऊर्जस्वलेतिविशेषविहितेन बलवा असंतत्वलक्षणस्यविनेर्बाधोमाभूदितिऊर्जस्विन्नित्यत्र विनिवि
धानं ऊर्जस्वीऊर्जस्वलो बलवान् ऊर्जस्विनीरित्यादिप्रयोगा ऊर्जधातोरसुन् तेनासुगागमोत्र निपा
त्यतइतिनाताघम् गावोस्यसंतिगोमी गोषाह्यासिनिः मलादिमज्जोमसच्च मलिनः मलीमसः अनसंति
क्त्वो दाग्री दधि ः नपरः किंत्वहावान् एकान्तरात्कतोनाजोनः सप्तम्याक्वनेतोसन्नेनोइतिभाष्यं स्ववान्

पं. सि. स्वं. ४९ 46

कारकत्वात् इति[illegible] दंडा अस्यां शालायामस्तीति दंडवती नन्वेवं कृत्तद्धितयोर्विशेषाकलितयोर्निषेधे कार्यो
कार्यिकस्तण्डुलीनतण्डुलिक इत्यादि न स्यात् सत्यं कृतो जातिविशेषणत्वात् कृदंतं यज्जातिवाचकमिति
नैवं कारकत्वानित्यत्वादिति ठनः प्रसंगः अनभिधानात् तथा च स्ववानित्यादावप्यनभिधानादेव ना
ति प्रसंग इति सिद्धान्तः "व्रीह्यादिभ्यश्च" व्रीही व्रीहिकः शिखादिभ्य इनिर्वाच्य इकन् यवखदादिषु इष्टा
भिधानलभ्यनियमस्फुटीकरणार्थं शिखादिभ्य इनिरेव यवखदादिभ्यष्ठन्नेवान्येभ्यस्तूभयमित्यर्थः तुं
दादिभ्य इलच्च तुंदादिनिठनौ मतुप्च अन्यतरस्यामित्यनुवृत्तेर्मतुप् तुंदिलः तुंदी तुंदिकः तुंदवान् तुंद उदर
पिचंड यववीहि अव्रीहिशब्देन तद्विशेषो ग्राह्यः शालिनः शाली शालिकः शालिमान् स्वांगाद्विवृद्धौ
विवृद्ध्युपाधिकात्स्वांगवाचकादिलजादिप्रत्ययवत्स्युः स्यात् विवृद्धौ कर्णौ अस्य कर्णिलः कर्णी कर्णिकः
कर्णवान् "एकगोपूर्वाट्ठञ् नित्यं" एकपूर्वाद्गोपूर्वाच्चातः इतान्नित्यं ठञ् नित्यग्रहणं पूर्वत्र विभाषानुवृत्तिनिवृत्तिज्ञा
पनार्थं एकशतमस्यास्तीत्यैकशतिकः ऐकसहस्रिकः पूर्वकालैकेत्यादिना कर्मधारयः अतः किं एकविंशति
मान् एकगविकः इत्यत्र समासान्तोत्पन्नावदन्तत्वं नन्वेकद्रव्यवानिति कथं नित्यग्रहणेन मतुपो बाधितत्वात्
सत्यं प्रमादपाठ एवायमित्येके द्रव्यशब्दान्मतुपि एकेन द्रव्यवानिति समासः इत्यन्ये एकदेशीत्यत्र त्वेकदेशिनेका
धिकरणे इति निर्देशादिनिरिति वाच्यं "शतसहस्रान्ताच्च निष्कात्" निष्कान्तौ यौ शतसहस्रशब्दौ तदन्यनता
न्मत्वर्थिकाट्ठञ्नित्यं स्यात् नैष्कशतिकः नैष्कसहस्रिकः "रूपादाहतप्रशंसयोर्यप्" आहतप्रशंसाविशि
ष्टार्थवृत्तेरूपशब्दाद्यप् स्यात् आहतमिति भावे क्तः ताडनेन निःपन्नरूपसुवर्णादिरूपं तदस्ति कार्यकारणयोरभेदा
दाहतशब्देनोच्यत इति न्यासकारः आहतरूपमस्यास्तीति रूप्यः कार्षापणः प्रशस्तरूपमस्यास्तीति रूप्यो गौः आहतेति
किं रूपवान् अन्येभ्योऽपि दृश्यत इति वक्तव्यं हिम्याः पर्वताः बहुहिमयुक्ता इत्यर्थः गुण्या ब्राह्मणाः हिमग्रहणादि ४९
निशमि गुण्यगुण्य इति न व्यभिगणादिनिमायः अस्मायामेधास्रजो विनिः तेजस्वी तेजस्वान् तसौ मत्वर्थे इति

भत्वान्नरुत्वं मायावी व्रीह्यादित्वान्मायी मायिकः स्रग्वी क्विन्नन्तत्वात्कुत्वं बहुलं छन्दसि मत्वर्थे विनिः स्यात् अ
ष्ट्रामेखलाद्वयोभयभुजा हृदयानां दीर्घश्चेति वक्तव्यं अष्ट्रादेष्वस्यास्य अष्ट्रावी पुनमष्ट्रावयवन् मेखलावी
द्वयावी मद्विस्तुभयाविनम् भुजावी हृदयावी मर्मणश्चेति वक्तव्यं मर्मावी सर्वत्र आमयस्योपसंख्यानं आ
मयावी सर्वत्रग्रहणं भाषार्थं शृङ्गवृन्दाभ्यामारकन्वक्तव्यः शृङ्गारकः वृन्दारकः फलबर्हाभ्यामिनज्वक्तव्यः
फलिनः बर्हिणः हृदयाच्चालुरन्यतरस्यां वाच्यं हृदयालुः हृदयी हृदयिकः हृदयवान् शीतोष्णतृप्रेभ्यस्तदस
हने चालुर्वक्तव्यः शीतं न सहते शीतालुः उष्णालुः तृप्रः पुरोडाशः स्फायितञ्चीति रक् तन्न सहते तृप्रालुः तृप्रं
दुःखमित्यन्ये उष्णाभ्य इति पाठस्त्वाकारविरोधादुपेक्ष्यः हिमाच्चेलुर्वक्तव्यः हिमं न सहते हिमेलुः उभयत्र विग्र
मन्तोऽसंज्ञार्थं बलादूलो वक्तव्यः बलं न सहते बलूलः वातात्समूहे चेति वक्तव्यं वातं न सहते वातस्य समूहो वा
वातूलः सिध्मादिषु मत्वर्थे प्रकारान्तरेण सिद्धावेतौ तप्पर्वमरुद्भ्यां वक्तव्यः पर्वतः मरुत्तः पित्त्वादनुदात्तत्वे
तन्निनिमित्तपाठादाद्युदात्तत्वमिति हरदत्तः तच्चिन्त्यं मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे इत्येतेनैव यथा
ऋत्वोपकल्प्यत्वात्पाठोऽपि प्रत्याख्यायस्य कैयटहरदत्तादिग्रन्थेभ्यो मध्योदात्तत्वलाभात् उपसर्गसंज्ञायाम
कृच्छ्रस्योपसंख्यानेऽदितेकृत्के निपाता आद्युदात्ता इतिसूत्रप्रसङ्गेनैन्यासे सत्ता तृतीयाकर्मणीति सर्वपदप्र
कृतिस्वरेण मरुत्तशब्दाद्युदात्तापत्तेः निपातत्वादव्ययपेतौ उपसर्गादिति दाधातोस्तत्वादुपपन्नेऽस्मिन्न मरु
न्नयतीत्यत्र नकारव्यवायेऽपि नत्वापत्तिः तस्य विधावेवोपसर्गसंज्ञारंभात् एवं वा उगिकि विधिनिषेधस्याप्यनापत्तेः
भात इति तन्नो नित्वेन मरुत्तशब्दस्याद्युदात्तत्वावश्यकत्वान्निपातत्वानंगीकारे वैयर्थ्यात् यत्तु हरदत्ते
नोक्तं मरुत्तपदे दयाद्दिरिति सूत्रेणैवावयितत्पुरुषे तुल्यार्थे तृतीयेति अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्त
नैव उपसर्गाश्चा[illegible]एवजमितिफिट्सूत्रादिति तच्चिन्त्यं निपातत्वादेवाद्युदात्तसिद्धेः सूत्रेभः प्रतिषेधमात्रम
नैनविधीयत[illegible]य इति भाष्यायस्वयमेवाकृत्वात् मरुत्त्वशब्दस्य निपातत्वानंगीकारादेवाद्युदात्तानुपपत्तेः

पं.
सि.स्त्रं.
४२
47

इति नत्रं दे

स्ग्रोकोर्तिवीर्ति...स्येम रुच्छाहस्य प्रत्ययस्वरेणान्तोदात्तत्वयाम रुच्छशाहस्य मध्योदात्ततायाउर्वीर्त्वात्
तस्मादत्र ननेनानि...मिति ग्रंथ्यानादेयएव नत्वप्रत्ययान्तनयापि महन्नशाद्वलमुत्पादनेन किंविद्यते इतितत्र कैयटेन
स्पष्टमेवमित्ययस्यनस्योक्तत्वाच्चेतिसिद्धं ऊर्णायायुस् ऊर्णायुः सिद्धपदसत्तार्थेन तथा च यकारादित्वनिर्बंधन
मसंज्ञावाधाद्यस्येति चेत्याकारलोपेन प्रवर्त्तते अत्रच्छंदसीत्यनुवृत्तिः अन्यथा अहंशुभमोरित्यत्रैव चूर्णापदो
पादानेऽपि धार्यदित्याहुः वाचोग्मिनिः वाग्मी आलजाटचौ बहुभाषिणि वाचालः वाचाटः कुत्सित इति वक्तव्यं
सम्यग्बहुभाषितरि तु वाग्मीत्येव भाष्यकृतस्तु पृथग्योगकरणसामर्थ्यादेवोक्तविभागलाभः नु चायमयो
गस्सम्यग्भाषितरि पूर्वस्तु कुत्सितेऽप्येवस्यादिति वाच्यं अभिधानस्यैव नियामकत्वादित्याहुः स्वामिन्नैश्वर्ये
ऐश्वर्ये गम्ये स्वशब्दादामिन् निपात्यते स्वशब्दोऽत्र विषयेऐश्वर्यवाची तेन धनवानिर्धनो वाईश्वराः स्वामिपदार्थः
विषयसप्तमी चेत्तु धनवचनादपि ईश्वरे प्रत्ययःस्यात् अतऐश्वर्य इति प्रकृत्यर्थनिर्देशः ऐश्वर्यं किंस्ववान् आ
त्मादिरपरोऽत्र स्वशब्दाद् ईश्वर्यानवबोधः अर्शआदिभ्योऽच् अर्शांसिसंत्यस्याऽर्शसः नच प्रत्ययस्वरेणैवान्तोदात्त
सिद्धाविति वैयर्थ्यं अर्शसोसीत्यत्रस्वरितोवानुदात्ते पदादावितिस्वरितवाधनार्थत्वात् अर्शस् उरस् तुंद चतुर
पलित जटा घाटा अभ्र अम्ल पवन स्वांगाद्धीनात् खंजः पादोस्य खंजः काणवदनस्य काणः वर्णात् शुक्लाः आसा
दाअस्मिन् शुक्लं नगरं आकृतिगणोयं द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः द्वंद्वः कटकवलयिनी शंखनूपुरिणी
उपतापोरोगः कुष्ठी किलासी गर्ह्यमशुभसूचकं ककुदावर्ती काकतालुकी प्राणिस्थात् किं पुष्पफलवान् वृक्षः
प्राण्यंगान्नायमिष्टः पाणिपादवान् अतइत्यनुवृत्तेर्नेह चित्रकललाटिकावती ठनादिबाधार्थ आरंभः वातातौ
साराभ्यां कुक्च उपतापत्वान्नूर्वेणसिद्धौ कुग्विधानार्थ आरंभः वातकी वातरोगी स्यात्सातिसारोति सारकीत्यम
रः वातवतीगृहेत्यादौ न रोगत्वाभावात् पिशाचाच्चेति वक्तव्यं पिशाचकी वैश्रवणः वयसि पूरणात् पूरणप्रत्य
यान्तान्मत्वर्थे इनिः स्यात् वयसि गम्ये पंचमोमासः संवत्सरोवास्यास्तीति पंचमी उष्ट्रः दशमी ठन्बाधनार्थोयंयोगः

वयसि किं पञ्चमवान् ग्रामः सुखादिभ्यश्च मत्वर्थ इनिः स्यात् सुखी दुःखी सुखेदुःखे अर्थ अतीन करुणा सोढ अन्ता
प शीलफल मालादेषु माली ब्राह्मणादित्वादिनेः सिद्धो इहपाठः दोषे मत्वमोवाधार्थः धर्मशीलवर्णान्ताच्च इनिः
स्यात् ब्राह्मणधर्मी ब्राह्मणशीली ब्राह्मणवर्णी हस्ताज्जातौ समुदायोपाधिरिह जातिः हस्ती गजः हस्तवानन्यः
वर्णाद्ब्रह्मचारिणि वर्णी अन्यत्र वर्णवान् पुष्करादिभ्यो देशे पुष्करिणी पद्मिनी देशे किं पुष्करवान्हस्ती बाहूरु
पूर्वपदाद्बलादुपसंख्यानं बाहुबली ऊरुबली सर्वादेश्चेति वक्तव्यं सर्वधनी सर्वबीजी अर्थाच्चासन्निहिते इति
वक्तव्यं अस्तीत्यस्यानाकांक्षाविरोधात् अर्थोऽसन्निहितोऽस्यास्त्यर्थी तक्रकौडिन्यन्यायादस्युपाधिकादिनेरभावइ
ति केचित् तदन्ताच्चेति वक्तव्यं धनरूपोऽर्थो धनार्थ इति कर्मधारयात्प्रत्ययः अनार्थोऽसन्निहितोऽस्य धनार्थी हि
रण्यार्थी ग्रहणवता प्रातिपदिकेन तदन्तविधिनिषेधात्पूर्वेणाप्राप्ते आरम्भः नेच्छन्त्येनं न तृतीयासमासोऽस्त्विति वा
च्यं लक्षणाभावात् तृतीयान्तस्य तेनेत्यस्यार्थशब्दविषयत्वादर्थिशब्देनेन समन्तदर्शनैः सम्पत्यस्य च प्रायिकत्वात्
न च धनमर्थयते धनार्थीति णिनिर्नाभिसिद्धिः कृताप्रकृत क्रियासाधनाभिधायित्वात् तदनुकूलव्यापाराभावव
ति प्रयोगानुपपत्तेः अगाद्भिगन्त्रादिप्रयोगाभावात् भाष्यकारास्त्वाहुः गदमस्यास्तीति देशेऽर्थवानिति प्र
योगात् द्रव्यस्य भावे वर्तनत्वात् क्रियायाश्च वाचकोऽर्थशब्दः तत्र क्रियावाचकाद्यस्येच्छानवनुभ्यामर्थी अर्थिक इति
सिद्धं न च मत्वर्थसंगः अनभिधानात् एवं धनवाचकादर्थीति बोध्यं अर्थाच्चासन्निहित इति वचनारम्भेतार्थक इति
रस्मिन्पत विशेषविहितेन इतिना ठनो बाधापत्तेः नन्वेवमपि निरीहीनस्यादि निषेध ईणिनः कर्तरि विधानान्नत्र तद्
भावनादेपि त्यस्भूत क्रियाकारकभावेशेषसंबंधे विहितस्य मत्वर्थीयस्य निरीहेपि सिद्धेः पुष्करपद्मउत्पलत
मालकुमुद नड कपित्थ बिस मृणाल कर्दम शालूक विटपकरीषशिरीषयवाष प्रवाह हिरण्य बलादिभ्यो
मतुबन्यतरस्याम् अन्यतरस्यामित्यनेन प्रकृतत्वादिनेः समुच्चयः निपातानामनेकार्थत्वात् चनो बाधार्थ वेद अ
न्यथासामान्यतेत्यस्याभ्यामेव द्वयसिद्धेः बलवान् बली बलः तस्मात् उत्साह उद्वास उद्वाम शिखामूल दंष्ट्रा कुल जाया

पं.
सि.सु.
५८
48

धायामप्रत्यये ... म आरोह परिणाह संज्ञायोर्मत्वाभ्यां मत्वन्तात्मकारोनात्वइनिःस्यात्संज्ञायाम् दामिनी
प्रथिमिनी अनिनस्मिन्नहणानीतिइमनिचोष्णुपादानं सोमिनी संज्ञायांकिं दामवान् सोमवान् कंशंभ्यांवभयुस्
तितुतयसः कंशमितिमांतौनिपातौमत्वर्थप्रत्ययः सुसत्यमोःसिद्धेपदत्वार्थं तेनानुस्वारपरसवर्णौ प्रथमोदन्त्यो।
ष्यादिनतयवर्णायादिः अनुस्वारस्यपरसवर्णोपदेवकारयकारपरत्वेसानुनासिकावेववकारयकारोकंवुः
कंतिः कंतः कंतः कंपः पवंषाहूइत्यादि तुन्दिवलिवटेर्भः तुन्दितोडुनइतिथालोविन्दप्रत्ययेतुन्दिर्वृद्धानाभिरिति।
माधवः सास्यास्ति तुन्दिभः तुन्दादित्वादिल् तुन्दिलः वलिभः वृद्धोवार्द्धिरसोनतंवगावलिभविप्रहङ्ग्रःपांडुरइ
तिश्रीहर्षः अत्रयकारादिलोपाड्डसंज्ञायामव्ययानामभमात्रेटिलोपः स्यादतः तद्धारणायसिद्धेपदसंज्ञार्थे व
टिभः वटेवष्टेनेरन् अहंशुभमोर्युस् मांतौनिपातौ अहंकारवानहंयुः शुभंयुस्तुशुभान्वितइत्यमरः पामादि
त्वान्नप्रत्ययेवलिनः ॥ इतिश्रीसिद्धान्तसुधानिधौपंचमस्याध्यायस्यद्वितीयपादेद्वितीयमाह्निकम् २ ॥
पादश्चायंसमाप्तः॥२॥

ॐ प्राग्दिशोविभक्तिः दिक्शब्देभ्यइत्यतः प्रागवक्ष्यमाणाःप्रत्ययाविभक्तिसंज्ञाः समर्थानांप्रथमादितिचपदद्वय।
मिहनिवृत्तं प्रतियोग्यनपेक्षत्वात्तयोरत्रप्रयोगात् विकल्पस्यत्वनुवृत्तिः तेनत्वसिलादीनांवैकल्पिकत्वंसिद्धं अत्रवा
र्त्तिकं विभक्तित्वेप्रयोजनंइदमइश्प्रतिषेधइदमोविभक्तित्वस्यदादिविधयश्चेति तथाहि दानीमोमकारहलंत्यमि
तीत्संज्ञास्यात् मिदचोन्त्यात्परइतिदेशविशेषविधेःप्रयोजनत्वात् विभक्तिसंज्ञायांतनविभक्तौतुस्माइतितन्न
तिषेधः नचैवंकिमोत्रइत्यादौनकारस्यापिइत्संज्ञानिषेधापत्तिः विभक्तौतवर्गप्रतिषेधोनतद्धितेइत्यनुक्तत्वात् यमो
हकारककारोनचतत्प्रतिषेधस्याऽनित्यत्वज्ञापनात् इतइहेत्यत्रकोःइदेयदादीतिसूत्रेणविभक्तेरुदात्तत्वं यद्यपि
इहेत्यत्रप्रत्ययस्वरेणापिविभक्तेरुदात्तत्वसिद्धिस्तथापिइतइत्यत्रनित्स्वरेणयकारपवादात्स्यात् नचमध्ये गो. ५८
पवादन्यायात्तदात्तेनोमश्चपिनोइत्यस्यैवविभक्तिस्वरोवाधकोनतलित्स्वरस्येतिपरत्वाद्धित्स्वरएवविभक्तिस्वर

बाधकः इति वाच्यं लितीत्यत्र ङिदिदं इत्यस्यात्र हृस्यालिङ्गत्वं बाधित्वा विभक्तिस्वरस्यैव प्रवृत्तेः साविकावस्तृतीया
दिर्विभक्तिरित्यत्र तृतीयामारभ्य प्रादिशः प्रत्ययाको विभक्तिसंज्ञानां ग्रहणात् ङिदिदमित्यत्रापि तथात्वात् एवं च
तोयेत्यादौ विभक्तिनिबन्धनेन तदाद्यत्वमिति बोध्यं किंसर्वनामबहुभ्योऽद्व्यादिभ्यः किमः सर्वनाम्नो बहुशब्दाद्वे
ति प्रादिशोऽधिकारः अद्व्यादिभ्य इति सर्वनामत्वात् ग्रहणेपि अद्व्यादिभ्य इति पर्युदासप्रसंगात् पृथग्ग्रहणादाने नव
द्व्यादिभ्यः किमर्थं बहुपाठवैयर्थ्यं कस्मिन् भवान् अकादित्यत्र त्यदादीनामत्वंरे नच्छिद्यतइति किमः शेषा द्व्यादिभ्यः
प्राग्वत्तत्पदिन्न भवत् शब्दरूपविशिष्टेनेति प्रयोजनसत्वात् इदमस्थः प्रादिशीये प्रत्यये परे पतेतो वयोः ॥ इद
मः पत्तइत इत्यादेशो लोपफलो यकारो रेचप्रादिशीये परे इशो पवादः एतदोऽन् इह हृत्त्विकाराग्रर्थे पठ
ति अत्रैवलनम् न च नांत पाठे प्रयोजनाभावादिस्तावित्याह नकारस्य अश्रवणं स्यात् इति वाच्यं अनेकालत्वात्स
र्वादेशो हृतेन लोपः प्रातिपदिकान्तस्येति लक्षणान्तरेण लोपसंभवात् अतसंज्ञानिबन्धनलोपविरहेपि तेन रूपभा
वात् स्यादेतत् पदत्वाल्लोपे कृते एकान्तान्त्यादेशो न स्यात् नचनुलोपस्याऽसिद्धत्वं सप्तवेत्यादेः परिगणित
त्वात् न च सर्वादेशात् स्वं प्रातिपदिकत्वाभावान्न लोपा उपपत्तिरिति अनेकाल्त्वात् सर्वादेशसिद्धिरिति वाच्यम् अ
न्त्रस्यापि स्वरूपेणार्थवत्वादादेशत्वाभावदशायामपि प्रातिपदिकलोपपत्तेः मैवं शब्दमात्रस्य रूपेणार्थव
त्वादर्थवद्ग्रहणसामर्थ्यात् स्वरूपातिरिक्तार्थकत्वस्यैव प्रातिपदिकसंलोपयोगित्वात् अन्यथानकारस्य ऊत्वापि
प्रवर्त्तनं स्यात् तथा च सर्वादेशात् स्वं प्रातिपदिकत्वाभावान्नलोपविरहादनेकाल्त्वमस्त्येव न इत्वं वचनका
र लोप इत्यत्र उपपत्तिभावात् अथ तथापि नकारवैयर्थ्यं पतञ्जलिः हृस्यत्वदाघ्रतेः कृते ऽदंतत्वादलोऽन्त्यपरिभाष
या ऽकारस्यादेशाप्राप्तावप्यकारस्याऽकारविधाने प्रयोजनाभावादेव सर्वादेशत्वसिद्धेः त्यादाद्यत्वस्येदमः
त्वं बाधकमित्यपणीका[illegible]पिदकारस्यतेनाऽनेन वा अत्वविधाने विशेषाभावात् मैवं लिङ्गत्वबाधार्थमपररूपमि
त्यस्यापि संभवात् [illegible] त्सर्वादेशार्थो नकारः यद्वा अकारवहृयान्नकोयं प्रकारान्नकआदेशाः पररूपेणाऽकार

पं
सि॰ स॰
४९
49

इयश्चेत्यादिति भा[illegible]त्रयोगविभागः एतदश्चान्वेको योगः एतच्छब्दस्य एत इत् इत्यादेशोऽस्तो रेफादौ थकारा
दौ च प्राग्दिशीये परे अनद्यतने र्हिल् रेफादिर्विधीयते नत्वप्रकारादौ तच्छब्दप्रकृतिकः प्रत्ययोऽप्रसिद्ध इति चे
न्नैव एतदस्य मौ रूपसंख्यानमिति वचनारम्भात् भाष्यकृता तत्प्रत्ययवादसामर्थ्यादेव तत्सिद्धिः नच प्रकारव
चनेन सामान्यविहितेन थाल् प्रत्ययेन एतन एव बाधितार्थाप्रसंगः इदमो विहितो यस्य कारादिः प्रत्ययस्तेनेति व्याख्ये
नात् थमौ रेवाद्यपात् इत्यत्र थमस्तत्र तथा प्रत्ययस्य बाध इत्याहुः प्राग्निर्दिष्टेति योगः एतदस्य स्यात्र्ययः सर्व
स्य सोऽन्यतरस्यां दि सर्वशब्दस्य स इत्यादेशो वा स्याद्दकारादौ प्राग्दिशीये परे ॥ पंचम्यास्तसिल् ॥ पंचम्यन्तेभ्यः कि
मादिभ्यस्तसिल् स्यात् ऊति हेति ऊ भावः ऊतः कस्मात् यतः ततः इतः अतः अमुतः बहुतः अद्भ्यादिभ्य इति प
र्युदासात् इह द्वाभ्यां वत् मत् भवद्भ्यां अस्माभ्यां युष्मत् अस्मत् भवत इत्यादि लोके नास्ति स्यान्निधीरच्युपतेमन्त्रानम
त्रा पर इत्यादौ तु सार्वविभक्तिकस्तसिर्बोध्यः इत्यादिरेव न तसिल् प्रत्ययस्य तस्यादेशस्तसिलश्च प्रकृत्यभावात् तेन तत्र
दस्मदो रजादेशो शेषे लोप इत्यनयोर्न प्रवृत्तिर्विभक्तित्वाभावात् ॥ तेरस्य ॥ उक्तप्रकृतिभ्यः परस्यान्तेरस्य तसिलादेशः स्या
त् तेरस्य तसिल् वचनं स्वरार्थं तेन विनीति प्रत्ययात् पूर्वस्यादात्तत्वं अन्यथा प्रत्ययस्वरेणान्तोदात्तत्वं स्यात् नवाधेत
सिल्तसेर्बाधक इति वाच्य तसिलस्त्ववकाशः ततो हीयते ततोऽवरोहति अपादाने चाहीयरुहोरिति तसेस्तत्रातुका
शात् तसेरवकाशो ग्रामतो नगरतो वा आगच्छतीति किमादित्वाभावादत्र तसिलोऽनवकाशात् ततः आगच्छतीत्या
दावुभयप्रसंगे परत्वात्तसिरेव प्रवर्त्तेत इति लिङ्गस्वराद्युपपत्त्या उक्तादेशविधेरावश्यकत्वात् न तु विभक्तिनिबंधनत्व
त्वात्तसिलो बाधकस्यत्तसेर्वोदाहार्यं अत्र तसिश्चेति स्वतंत्र एव प्रत्ययो विधेयः अस्य विभक्तिसंज्ञाकत्वादकार्यसिद्धेः
स्वरस्यैवान्यथासिद्धप्रयोजनत्वादिति ॥ पर्यभिभ्यां च ॥ तसिल् स्यात् सर्वोभयार्थाभ्यामिति वक्तव्य परितः अभितः सर्व
त उभयत इति वक्रमेणार्थः सप्तम्यास्त्रल् सप्तम्यन्तेभ्यः किमादिभ्यस्त्रल् स्यात् कुत्र यत्र तत्र बहुत्र स्यादेतत् तसिल्

४९

त्रलादयो विभक्त्यादेशास्तेन त्रा वा पंचम्याः सप्तम्याश्चेत्यत्र षष्ठ्यां प्राप्तस्य पंचम्यां च द्वितीयस्य पञ्चम्यो लासात्
नाद्यः नेत्युक्ते तसिलादयो विभक्त्यादेशाश्चेत्युक्ते तस्य गुणादीर्घत्वे त्वोत्वस्याप्यादि विधिप्रतिषेधः तथाहि ततस्तो
पतस्त्यः तत्रात्यादयश्चेत्यादेशस्य योधातुप्रातिपदिकयोरिति सुपो लुक् स्यात् यदा तदा इत्यत्र अनुदात्तौ सुप्पितावि
त्यनुदात्तत्वं स्यान्निबद्धावेन तसिलादीनां सुप्त्वात् एवं विभक्तिविशेषधर्मोऽपि योज्यः स्यात् यतः इत्यादौ घेर्ङिती
तिगुणः स्यात् तर्हीत्यत्र सुपि चेति दीर्घः स्यात् तेवेत्यर्थकेन त्रेत्यत्र बहुवचने झल्येत् स्यात् अत्रेत्यत्र प्रत्ययस्थादिति त्वते
स्यात् ततः त्यत्रेत्यादौ सर्वनाम्नः स्मै ङसिङ्योः स्मात्स्मिनौ इति स्यात् न द्वितीयः पंचमीनिर्देशो हि तसेस्त्रेत्यस्य पंचम्याः
परस्य तसेस्तसिलादेशो भवतीत्यर्थः तत्रस्थानिनि इकारस्य उच्चारणार्थत्वात् तस्मात्तस्येतीत्यत्रैदेवाधिकस्य त
स्य उपलक्षणम् इति धातोरपि तसिलादेशः स्यात् तो ह्येतत्सामर्थ्याच्च प्रत्ययताभावेऽपि लित्स्वरः स्यात् आदेशापत्तेत
नाद्ये दोषः पंचम्याः स्थाने यस्तसिलस्येव तसिलादेशविधानात् अपादाने चाहीयरुहोरित्यत्राप्यादेशपत्ता प्रय
णात्र दोषः इति प्राप्ते सिद्धान्तः स्वतंत्रप्रत्ययत्वपक्ष एव युक्तः आदेशपक्षे उक्तानेकदोषवारणार्थं वचनान्तरारंभ
प्रसंगात् प्राथम्यात्पंचम्याः प्रयुक्तत्वाच्च नचात्र दोषः स्वार्थिकसाहचर्येण पंचम्यन्तप्रकृत्यर्थ एव तसेः स्या
निवेनोपादानात् धातोः पंचम्यानार्थवृत्तित्वाभावात् इकारविशिष्टस्यैव तसेरादेशविधानाद्वा इदमो र्हः त्रलो
ऽपवादः इशभावः इदः ॥ किमोऽत् ॥ सप्तम्यास्त्रलः किमोऽत् स्यात् उत्तरसूत्राद्विकल्पापकर्षः वाग्रहणोऽत्रैवापकर्षणीय इत्य
र्थः पक्षे त्रल् क्वातीति क्वभावः अतो गुणे इति पररूपेण क्व अत्र क्वेति नित्यस्वरितः नचतविभक्तौ तस्मादित्यस्य प्रस
गः तदन्तित्यतायाऽयुक्तत्वात् यद्यपि द्वित्निकारादयो भाषायां त्रले नेष्टा इति तथापि प्रयोगप्राचुर्याज्ञापकत्वान्न दोषः वा ह
च छन्दसि ॥ कुहस्थः कुहजग्मथुः ॥ इतराभ्योऽपि दृश्यन्ते ॥ पंचमी सप्तमीभिन्नविभक्त्यन्तेभ्योऽपि तसिलादयो दृश्यन्ते भवदा
दियोगा इति वक्तव्ये दृशिग्रहणं लभ्यार्थकथनपरम् भवान् दीर्घायुर्देवानांप्रियः आयुष्मान् इति भवदादय इति
भाष्ये सभवान् [illegible]तान् तत्रभवान् तंभवंतं ततोभवंतं तत्रभवंतं तेनभवता ततोभवता तत्रभवता तस्मैभवते

पं.
सि.स.
५०
50

ततो भवति तत्र ... र्वैवंचन्यादिभ्यस्त्रयेपि एवं सदीर्घोपिः तत्रादीर्घोपुरित्यादि सर्वैकान्यकिंयत्तदः काले दा
सप्तम्यन्तेभ्यः काले ... भ्यः स्वार्थे दा स्यात् सर्वस्मिन्काले सदा सर्वदा एकदा अन्यदा कदा यदा तदा वि
भक्तित्वात्किमश्च इत्यादि काले किं सर्वत्र देशे ॥ इदमो र्हिल् ॥ सप्तम्यन्तात्कालार्थादिदमो र्हिल् स्यात् हस्याप
वादः एतादेशः अस्मिन्काले एतर्हि काले किं इह देशे इदमदातिरिक्तपदगम्ये तत्कालेपि इह प्रत्ययः इह हि
समयेऽसदेहेषु अंगेषु देवत्वनामिति श्रीहर्षः अधुना सप्तम्यन्तात्कालवचनादिदमः स्वार्थे अधुना प्रत्ययः
यस्मात्प्रत्ययविधिरिति सूत्रेण स्त्री अधुनेत्यत्र अधुना प्रत्ययनिरूपितायाः स्त्रीशाहेमसंज्ञायां भाष्ये शंकितत्वा
त् इदम इश् यस्येति लोपः अधुना इदमोऽशादेशा अधुना च प्रत्यय इति प्रत्तान्तरे अधुनेत्यस्य प्रत्ययत्वे पूर्वसूत्र
एव प्रत्ययद्वयनिर्देशान्निर्वाहे योगविभागवैयर्थ्यात् उक्तरीत्याऽशादेशनिपातनार्थत्वेन तत्सार्थक्यात् स्व
रेवाविशेषस्य स्पष्टत्वात् न च इह काले वर्त्तरीति नपुंसकसामानाधिकरण्यान्नुमागमापत्तौ यस्येति लोपानुप
पस्यात्रमभावार्थं निपातनमिति वाच्यं भूम्नि कृतेपि नस्तद्धिते इति टिलोपेनैव इष्टसिद्धेः ॥ दानीं च ॥ केचिदिदानी
मिति संज्ञपठन्तीति कैयटः ननु इदम इशभावे ऊडिदंपदादीति इदमः परात्तृतीयादिर्विभक्तिरुदात्तेति अतो दा
नप्रसंगः नैवं दानीमित्याद्युदात्तनिपातनसामर्थ्यात् आदेः परस्येति वचनाद्दासिद्धेः ॥ तदो दा च ॥ तदा तदानी
तदो दावचनमनर्थकं विहितत्वात् केचित्तदाप्रत्ययेऽपि अदाप्रत्ययेन तदा शाह आद्युदात्तः दाप्रत्यये घत्वमोदात्तं इति।
विशेषादिति कैयटः अनद्यतने र्हिलन्यतरस्याम् कर्हि कदा यर्हि यदा तर्हि तदा एतस्मिन्काले एतर्हि इदमेत
दोऽन्यतमेनत तयोर्दार्हिलौ च छन्दसि इदमस्तदश्च क्रमेण छन्दसि दार्हिलौ स्तः इदानीं हि विभक्तित्वादिदमः इ
शस्य दाधत्वं च तयोरिति प्रातिपदिकनिर्देशः तयोरित्यस्य सर्वोक्तयोगद्वयपरत्वे हि न हि षष्ठ्ये दार्हिलोस्तस्यका
र्योगद्वयविहितो प्रत्ययो च भवत इति वाक्यार्थः तत्र यथासंख्यमेतेन तच्च छन्दसि अस्य छन्दसि तदा तदानीं तर्हीति हू ग्रं
पत्रयस्य इदमस्तु इदा इदानीमिति रूपद्वयस्य सिद्धावपि अधुनापत्यर्हीति द्वयं न स्यात् छन्दसि विभाषाविहि ५०

ताभ्यां दानीम्भ्यां र्हिल् पुनाप्रत्यययोर्बाधप्रसंगात् यदि तु यथासंख्यमनाश्रित्य इदमो र्हिल् विधीयते त ।
थापि प्रथुनेति न स्यात् यदि तु तयोरिति प्रत्ययपरामर्शात् पूर्वसूत्रविहितप्रत्यययोर्विषये दार्हिलौ विधीय
तेन दाप्रातं तर्यान्नदपवनौ स्यातामिति इदानीं रूपं न स्यात् प्रातिपदिकपरत्वेन तु चकारेण यथाप्राप्तमप्युक्ता ।
नादिष्टसिद्धिः सद्यःपरुत्परार्य्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः प
तेनिपात्यन्ते समानेऽहनि सद्यः समानस्य सभावो द्यश्च प्रत्ययः पूर्वस्मिन्वर्षे परुत् पूर्वतरे परारि प्रकृत्योः पर
भावः दारी च प्रत्ययौ संवत्सरे वाच्ये अस्मिन्संवत्सरे एषमः इदमः इशभावः समसण् प्रत्ययः णित्वाद्वृद्धिः एतदि सं
दर्शितसन्निवेशाद्यकृत्वराभूतसरोजकोष्ठो ईमावियनो पुनरेषमस्तु कचौ कियनोपरनो भवेताम् अहनि एव
पाह्लादेयवि इदमोऽश्यश्च अस्मिन्नहनि अद्य अथ एके दिवसमस्मासिन गुरुनी है विधेयस्तव पूर्वादिभ्योष्टभ्यो
ह्न्यर्थे एद्युस् पूर्वेद्युरग्निर्गृह्णाति अन्येद्युरान्मा अवस्यभावे इत्यादि पुत्रोऽभयाद्धकत्व्यः तस्मात्तु उभ्यो ।
द्युरुभयद्युः प्रकारवचने थाल् सप्तमीकालग्रहणे निवृत्ते किंसर्वनामबहुभ्य इत्यस्यानुवृत्तिः तेन प्रकारेण
तथा यथा अहं प्रकारप्रथमो नाना न भवत्यनभिधानात् प्रकारेण वचने स्यात्प्रकारशब्दस्य सादृश्यस्य ।
प्रकारशब्दार्थत्वेऽप्यनतथा किन्तु सामान्यस्य भेदको विशेषः इह प्रकारः यथा ब्राह्मणसामान्यस्य माठरका
तुकादय इति हरदत्तः जातीयस्तु प्रकारवानर्थः शक्तिस्वाभाव्यात् अतः किमादिभ्यो विशेषविहितोऽपि थाल्
न तद्बाधकः तथाजातीयोऽन्यथा जातीय इति भाष्यप्रयोगात् तेन तज्जातीय इत्यादिसिद्धं इदमस्थमुः एतदो
धयमित्युक्तं थालोऽपवादः उभयोर्विध्यादेशः अनेन एतेन वा प्रकारेण इत्थं द्वितीयातादृश्ये इममेतं वा प्रका
रमापन्न इत्थंभूतः कथंभूत इत्यादिस् अलोकव्यवहारात् किमश्च केन प्रकारेण कथम् थालेतौ च वक्तव्यौ दसि
वाल्मीकौ कथासां न एष्यति कथा देवा आसन् केन हेतुनेत्यर्थः ॥ प्रादिपीयाः संपूर्णाः ॥ दिक्शब्देभ्यः स
प्तमी पंचमी प्रथमाभ्यो दिग्देशकालेष्वस्तातिः सप्तम्याद्यन्तेभ्यो दिशि रूढेभ्यो दिग्देशकालार्थेभ्योऽस्तातिः ।

पं.
सि.स.
५१

51

स्यात्तथा यत्पूर्वं ...ति ...स्याः पूर्वो वा दिक् पुरः पुरस्तात् अवः अवस्तात् इत्यादि एवं देशे काले च योज्यम् पू
र्वादीनां पुरादेश ...देशावरत्वेन पुरत इति तद्ग्रामादिकमित्येके स्यात्पुरः पुरतोऽग्रत इत्यमरात्पुरतः पृथ
गेवाग्रे इति विरमात्पुरमहाकविप्रयोगबाहुल्याच्च निपातान्तरमित्यन्ये पुरःपुरगमनेन इत्यस्मादपि वैयर्थ्यकः
सार्वविभक्तिकस्तसिरित्यपरे अन्येन ददातिरोणत्तराभ्यां तस्यैव सिद्धावतस्तस्यैवाविधानमन्यतोऽपि तद्विधा
नार्थं स्वमग्रगमनमित्यस्मात् क्विप् ततोऽतसुच् न वर्चावित्ति दीर्घापत्तिः भसंज्ञत्वात् न च वित्वे पिपाति
कायुदात्तत्वार्थमकार इति वाच्यं प्रयोगानुरोधादकारार्थत्वस्यैव युक्तत्वात् इत्यके दिक्शब्दाः पू
र्वादयो ...न्नेन तु योगिकापेद्दीत्यादयः तत्र दिशा उपलक्षणत्वात्सर्वस्मिन् पूर्वोऽवसतीत्यत्रापि स्यात्
दिक्कालान्यत्रसंबन्धात्पूर्वशब्दस्य पूर्वोऽह्नः तद्वारणाय दिग्देशकालेष्वित्युक्तं न च विभक्तीनामर्थो
नां च यथासंख्यप्रसंगः स्वरितत्वाद्यप्रतिज्ञानात् पूर्वं ग्राममगत इत्यादिवारणाय सप्तमीत्याद्युक्तं पूर्वादिशब्दा
नां च यद्यपि स्वभावादेव निरपेक्षाणां दिग्देशकालवृत्तीनां भेदस्तथापि साहचर्यभेदमाश्रित्य दिक्शब्दा
देभ्य इत्युक्ते न च पूर्वस्मिन्देशे इत्यत्रापत्तिः देशविशेषणत्वेन देशत्वात् तथा च भाष्ये नैव देशो दिशा वि
शेषणमेव दिति अस्यायमर्थः विशेषणविशेष्यभावे कामचारात् कारकादिवत् पूर्वादिपदार्थस्य विशेष्य
त्वे देशस्य विशेषणत्वे इत्येकः पक्षः वैपरीत्येन द्वितीयः तत्राद्ये प्रत्ययार्थस्य विषयसप्तम्यर्थत्वाद्विशेष्यस्य
विशेषणे स्वार्थेऽन्तर्भावयितुमशक्यत्वात् पुरस्तादित्यादेर्दिग्देशकालसाधारण्यानुक्तविशेषाभिव्यक्त्यर्थे
पुरस्ताद्दिशा आगत इत्यादौ विशेषणस्य दिगादेः प्रयोग इति देश इत्यन्यदेतत् द्वितीये तु न प्रत्ययः दिग्दे
शकालेषु वर्तमानेनेन दिगादीनामुपाधित्वावगमाद्विशेष्यत्वानवगमात् प्रत्ययान्ताद्दिगादीनामनवगमे
उपाधित्वायोगात् पूर्वाद्यर्थानां विशेषणतया तेषां प्राधान्यमन्तर्भावयितुमशक्यत्वाच्च तथा च नैव देशा इ
त्यस्यैव पूर्वादिर्देशेन विशेष्यत इत्यर्थः अन्येन तु नायमवधिमत्वेन देशउपात्तः किन्त्ववधिनिरपेक्षस्य देश

५२

स्यैतद्विशेषणं वस्तुतो व्यवस्थासत्त्वात्सर्वनामसंज्ञा अवध्यपेक्षार्थवाचिभ्यः पूर्वादिभ्यः प्रत्ययोत्पत्तेः उ
क्तावधिनिरपेक्षाणामेव पूर्वादीनां प्रयोगात् पूर्वदेशाद्दक्षिणापथं गच्छन्कन्नाग्रागतस्त्वमिति दृष्टः पूर्वो
देश्यायासीति उत्तरपथप्रत्यागच्छंश्च दक्षिणापथ्यासीति इत्यादिः दक्षिणेनत्रायामनतस्य आत्मानेरपवादः
दक्षिणतः उत्तरतः स्यादेतत् तस्तेनैवास्तु प्रकृतेरकारान्तत्वादेव रूपसिद्धेः प्रत्ययेस्यकाकृते प्रत्ययस्वरे
णैवान्तोदात्तसिद्धेश्च चकारपरित्यागे लाघवाच्च नचवं टनाभ्यां प्रत्ययेन रूपेन सिध्येत् भाषितपुंस्कत्वाभावे
तसिलादिष्विति पुंवद्भावस्याऽप्रवृत्तेः दिक्शब्दानां निमित्तान्तरनिरपेक्षत्वात् देशकालयोश्च व्यवस्था
सापेक्षाणामिव प्रवृत्तेः नचोभयत्रापि व्यवस्थाशब्दत्वमस्तीति वाच्यं दिक्शब्देभ्य इत्यादिविहितकार्याणां दे
शकालयोरप्रवृत्त्यापत्तेः व्यवस्थाशब्दत्वे दिशः प्रवृत्तिनिमित्तत्वाभावादुपलक्षणत्वानुपपत्तेः नचयथा
कालशब्दाः संख्याशब्दाः षष्टिवर्षाणीभूतः षाष्टिक इत्यादौ कालाधिकारविहितकार्यभाजः प्रवृत्तिनिमि
त्ताभावेपि निमित्तत्वेनाप्यर्थस्योपलक्षणत्वादेवमिहापीति वाच्यं दिग्दृष्टमात्रस्य दिक्शब्दत्वे रमणी
यद्योभवनादिशब्दानामपि दिक्सामानाधिकरण्यसत्त्वाद्दिश्यापि दिक्शब्दत्वनिबन्धनकार्यापत्तेः अथ
स्वरूपव्यतिरिक्तप्रवृत्तिनिमित्तनिरपेक्षपूर्वादिशब्दाः सदिक्शब्दाः अन्यथा लिप्सुरित्येवं निर्वाहे शब्दप्रा
वृत्तानवैयर्थ्यात् नचैवं पूर्वादिशब्दानां दिग्ग्रामध्यपत्लेऽसंज्ञायामिति सर्वनामसंज्ञानिषेधापत्तेः पौरुषेय
संकेतस्य वसंज्ञात्वात् दिनवसंकेतस्यानादित्वात् प्रत्तोनरमणीयादिष्वति प्रसंग इति चेत् सत्यं तथापि दि
शि वर्तमानानां प्रवृत्तिनिमित्ते कालिंगानवयोगाभावेन भाषितपुंस्कत्वाभावात् पुंवद्भावदोषलेशात् मैवं
सर्वनाम्नो वृत्तिमात्र इति वचनस्य दक्षिणोत्तरपूर्वाणामित्यादिसिद्ध्यर्थं प्रावश्यकेतवाक्तिनैव पुंवद्भावसिद्धे
र्न भाषितपुंस्कत्वस्यानपेक्षितत्वात् न च दिक्शब्दानां व्यवस्थायाः प्रवृत्तिनिमित्तत्वाभावे सर्वनामसंज्ञे
त्तरस्त्रीतिक[illegible]वचनेनापि निर्वाह इति वाच्यं बालमध्यव्यवस्थायाः संज्ञा वादेः वत इपपत्तेः व्यवस्थाया

पं
सि॰ कौ॰
५२

ोताववधेयामिति एतेनानन्तरसहन्निनिमित्तमित्यभ्युपगमात् तस्मादन्यथा टाबकारो व्यर्थ इति दूर्वेपूतः
सिद्धान्तलक्षणेऽप्यतसर्थप्रत्ययेनैतत्रविशेषणार्थोऽकारः तसर्थेऽख्यमाने ततो ग्रामादित्याद्दावपि
षष्ठीप्रसङ्गात् यद्यपि ग्रामादित्यत्रापादानत्वात्पञ्चमी तदाकारकविभक्तेर्बलीयस्त्वान्नग्रामसमीपाद्य
पदनिबन्धनषष्ठीप्रसङ्गस्तथाप्यन्यादियोगनिबन्धनपञ्चमीबाधित्वात्तसर्थयोगनिबन्धनाषष्ठीस्यादि
त्यापादनीयं ॥ विभाषा परावराभ्यां अनस्त्वेऽपि पक्षेऽत्रावस्तातिः परतः अवरतः परस्तात् अवरस्तात्
अञ्चेर्लुक् अञ्चत्यन्ताद्दिक्शब्दात्परस्यास्तातेर्लुक् लुक्तद्धितलुकीति ङीपो लुक् प्राक् उदक् प्राच्यां प्राग्
च्याः प्राची वेत्यादिरर्थः एवं देशे काले च योज्यं ॥ उपर्युपरिष्टात् अस्तातेर्विषये ऊर्ध्वशब्दस्य उपादेशो रि
ल्रिष्टातिलौ च प्रत्ययौ निपात्येते उपरि उपरिष्टाद्वा वसति आगतो रमणीयं चेति विभक्तित्रये योज्यम् पश्चा
त् अस्तातेर्विषयेऽवरस्य पश्चादेशः आतिश्च प्रत्ययो निपात्यते पश्चाद्वसतीत्यादि दिक्पूर्वपदस्य चावर
स्य पश्चभाव आतिश्च वक्तव्यः दक्षिणपश्चात् उत्तरपश्चात् दक्षिणपरायां प्रकृतिवपरायां वा दिशि वसतीत्य
र्थः अर्धोत्तरपदस्य चावरस्य समासे पश्चभावो वक्तव्यः दक्षिणपश्चार्धः उत्तरपश्चार्धः अर्धं हि वपरतोऽवरस्य
पश्चभावो वक्तव्यः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् पश्चपूर्वार्धवद्वक्ति अवरस्यास्ता
त्यर्थे निपातौ पश्चाद्विसर्गेणेतत्पश्चा उत्तराधरदक्षिणादातिः उत्तरात् अधरात् दक्षिणात् वसतीत्यादि एनब
न्यतरस्यामदूरेऽपञ्चम्याः विभक्तित्रयेऽप्रकृतेऽपञ्चम्याः पर्युदासे सप्तमीप्रथमान्तेभ्यः उत्तरादिभ्य एनब्वा स्यादव
धवधिमतोः सामीप्ये उत्तरेण अधरेण दक्षिणेन दिक्शब्दमात्रादयमिति केचित् तदुक्तं काशिकायां केचि
दिहोत्तरादिग्रहणं नानुवर्तयन्ति दिक्शब्दमात्रात्प्रत्ययं मन्यन्ते इति पूर्वेण ग्रामं अपरेण ग्रामं अतः पञ्चम्यपञ्च
म्या इत्यस्य प्रत्ययात्यागपरिक्तं बोध्यं अपञ्चम्या इति प्रागसेरिति वचनात् दक्षिणादाच् अस्तातेर्विषये दक्षिणा
वसति रमणीयं वा दक्षिणादागत इत्यत्र न पञ्चम्यन्तत्वात् यद्यपि चकारेणानातो दान्तार्थः प्रत्ययस्वरेणैव सिद्धेः

तथापि प्रत्याहारादिति निर्देशे आजाहीत्यत्र विशेषणार्थः तेन वाक्यस्मरणायोयं प्रकारो न तु बंधस्तद्याहुन्निः" आहि
च दूरे" दक्षिणादाजित्येव वाराच् दक्षिणाहि दक्षिणा" उत्तराच्च" दूरे उभयं स्यात् उत्तराहि उत्तरा दक्षिणात उत्तरतो
वा आगत इत्यत्र न पंचम्यंतत्वात्" पूर्वाधरावराणामसि पुरधवश्चैषां" पंचम्यास्तात्पर्य्ये असिप्रत्ययः स्यात् न
त्संनियोगेन क्रमात् पुर अध अव इत्यादेशाश्च क्रमात्स्युः पुरः अधः अवः" अस्ताति च" अस्तातौ परेपि पूर्वोक्ता
देशाः पुरस्तात् अधस्तात् अवस्तात् दिक्शब्देभ्य इत्यस्तातिः प्रागुक्तः" विभाषावरस्य" अस्तातौ परे अवादेशो वा
अवस्तात् अवरस्तात्" संख्याया विधार्थे धा" न तु विधाशब्दात् स्यान्न वा चकताया अपि सत्वादेकारोपिधा हस्तिविधे
त्यादावपि स्यात् अत्र वार्त्तिकं संख्याया धातोरव्यपृथग्भावे इति वचनं कर्तव्यम् नतु धातूक्तार्थे इति सूत्रस्यापा
त्वर्थं प्रकारकपदं तु तत्षष्ठीसमासात् क्रियापदं नाद्यः देवदत्तः कंसपात्र्यां पाणिनौदनं भुंक्ते इत्यादौ भोजनक्रि
याकारकाणां कर्त्राधिकरणकर्मणां भेदसत्त्वात् अन्यथापत्तेः नांत्यः प्रातर्भुंक्ते सायं भुंक्ते इत्यादौ कालभेदेन क्रि
याभेदसत्त्वात् मैवं कारककालप्रवृत्तिविशेषरूपक्रियायाः पृथग्भावे इत्यर्थात् गच्छतीत्यादावानात्वभाव
तो नित्यं न भेदायापचप्रतीयमानायाः क्रियायाः पंचधा गच्छतीत्यादौ प्रकारलक्षणस्य पृथग्भावस्य प्रती
ते भाष्यकृतस्त्वाहुः एतद्द्विप्रकारे धाप्रत्यय इति फलितार्थः तथा च सूत्रेणैव सिद्धं विधाशब्दस्य प्रकारार्थ
त्वसद्भावात् एवं विधानमित्यादिप्रयोगात् सामान्यस्य भेदको विशेषो द्विप्रकारः पूर्वोदाहृतयोः कारका
कालपृथक्त्वयोः सकृद्भुंक्ते द्विर्भुंक्ते इत्यादौ गुणपृथक्त्वेनैव कस्यचित्सामान्यस्यानुपादानं कस्य भेदकः प्र
कारकरूपः स्यात् न तु सूत्रेणीत्यापि एवं धा श्लोका इत्यादावपि धाप्रत्ययः क्रियया प्रकारस्या विशेषितत्वात् वा
र्तिकरीत्या तन्न भाव्यं क्रियापृथग्भावे इत्युक्तत्वात् एवं एकधा भुंक्ते इति न भाव्यं सूत्ररीत्या तद्भाव्यमिति फल
भेदः अत्राहुः एकधा श्लोका इत्यादावपि क्रियाध्याहारादाले क्रियापृथग्भावः एवं नवधा द्रव्यमित्या
दावपि [illegible] दिक्रियावध्या एकधा भुंक्ते इत्यादावप्यनेकप्रकार भुजिक्रियाया अस्त्येव एकः पाकः पाकः

पं॰
सि॰ कु॰
५१
53

णादानप्रकाशते प्रक्रियायोः तथाभावपक्षप्रकारभुजिक्रियादिविवक्षितत्वात् विवक्षायां त्वेकधा पाक इ
त्यस्येष्टत्वात् एवं पाक इत्यादौ तत्पाकव्यक्तीनां भेदो न त्वेकस्य प्रकारत्वं च विवक्षितं एकस्य प्रकारत्वस्या
विवक्षायां तु एवं तथा पाक इत्यस्येष्टत्वात् अधिकरणविचाले च द्रव्यस्य संख्यान्तरापादने संख्याया धा स्यात्
एकं राशिं पञ्चधा कुरु एकाद्धो ध्यमुञन्यतरस्याम् एकशब्दात्प्रकृतिकस्य धाप्रत्ययस्य ध्यमुञादेशो वा ऐकध्यं कु
रु एकधा वा महाविभाषातः प्रकृत्या न वर्तिष्यते न वा ग्रहणं धामात्रस्यादेशार्थं अन्यथा ऽधिकरणविचालपवध्य
ग्रस्तं तत्प्रत्यय इति संभाव्येत तथा चैकध्यं भुङ्क्ते इति प्रकारार्थे न सिध्येत् वाग्रहणात् अयथार्थकस्यापि
धाप्रत्ययस्यादेश इति सिद्धम् ननु एकस्य द्रव्यस्याविभागेनावस्थापनं अधिकरणविचालः तथा चैक
ध्यं राशिं कुर्वित्यत्र न स्यात् न च वचनसामर्थ्यं प्रकारार्थकधाविषयकत्वेनोपपत्तेः नापि वाग्रहणसाम
र्थ्यं उक्तार्थत्वेनाप्युपपत्तेः ऐकध्यं भुङ्क्ते एकं राशिं ऐकध्यं कुर्वन्तीति अत्र वार्तिकं महाभावे ध्यमुञ् इति वक्तव्यं भा
ष्यकृतस्तु अन्यथा करणविचालपदार्थः सचैकस्यानेकीकरणं अनेकस्यैकीकरणं चेत्युभयत्राप्यविशि
ष्टमिति तत्रैव सिद्धमित्याहुः नन्वेकस्यानेकीकरणे प्रकारसद्भावात् विधार्थत्वादेवोपपन्नो ऽधिक
रणविचाले चेति सूत्रं वैयर्थ्यमत्राहुः अनेकस्यैकीकरणे तत्र प्रकाराभावान्न दर्थं तदिति द्वित्र्योश्च धमुञ्
त्राभ्यां परस्य धाप्रत्ययस्य धमुञ् वा द्वैधं द्विधा त्रैधं त्रिधा चकारो विकल्पानुकर्षणार्थः धमुञन्तात्स्वार्थे इति वक्त
व्यं पथि द्वैधानि संशयद्वैधानि चकारो विकल्पानुकर्षणार्थः धमुञन्ता स्वार्थिकत्वेपि स्वभावात्सत्त्ववाचिता
लिङ्गसंख्यायोग एकशेषेण बहुवचनमिति कैयटः एधाच्च द्वित्रिप्रकृतिकस्य धाप्रत्ययस्य एधाच् आदेशः स्यात् द्वेधा
त्रेधा यस्येति चेति ईकारलोपः योगविभागो यथासंख्यनिरासार्थः याप्ये पाशप् कुत्सितो वैयाकरणो वैया
करणपाशः ननु पाचितागुणात् अस्मादित्यपादानसाधनायाप्यशब्दः कुत्सितार्थः याप्यते देशान्तरं नीयत इ
ति कर्मसाधनः ततो विशेषानुपादानात् दन्तिसादिष्वपि प्रसङ्गः मैवं कुत्सितग्रहणस्य तन्त्रस्यानेकार्थत्वात् नच

उक्तमिन् इति वक्ष्यमाणाधिकारमपवादमपि विधीयत इति वाच्यं निरंकुशत्वादपि प्रसंगात् न चैकशब्दादावि
द्वादिनिबंधनकृत्सायामपि प्रयंग्यस्यादिति वाच्यं प्रत्यासत्त्या प्रकृतिनिमित्तनिबंधनकृत्सायामपि प्रयं
स्यादिति वाच्यमेव प्रकृते नैः न चैवं प्रत्ययकोटेरवस्त्रकइत्यादावव्याप्तेरपत्तुपपत्तिः आगत्यातत्त्यहवरिन
गुणक्रियादिकृत्सायां तत्रप्रत्ययइतिस्वीकारात् पर्यवसन्नलयन्यायत्वादिहेवदन्नयाशाइत्यपि भवतियद्यः
भिधानमस्तीतिकैयटः श्रवणाज्ञायेत्यादिनात् श्रवणार्थकतीयप्रत्ययातात् अतस्मात् द्वितीयो भागो
द्वितीयः अनित्यादाद्युदात्तत्वविशेषः श्रवणग्रहणं शक्यमकर्तुं श्रवणेनिरिकार्थकस्यतीयशब्दस्याः
भावात् शुक्लेतीयः पार्श्वतीयइत्यादौचतीयस्यानर्थकत्वात् मैवं प्रागेकादशभ्योऽछंदसि श्रवणश्रय
यातांज्ञो गात् चतुर्थोभागश्चतुर्थः पंचमः प्रागिति किं एकादशाइत्यादौ मा भूत् अछंदसिकिं पंचमीमिह
यमस्यशाकामत षष्ठाष्टमाभ्यांञच वादत् षाष्ठः षष्ठः आष्टमः अष्टमः मानपश्वंगयोः कन्लुकौच
षष्ठाष्टमाभ्यांञः षष्ठको भागो मानं चेत् अष्टको भागः पश्वंगं चेत् भस्याऽनोवालुक् चकारादतयथा
आंशन्तचतुर्वर्गदिनादृतम् एकादाकिनिच्चासहाये चकारः कन्लुकश्च समुच्चयार्थः लुक्काशकिनिचः
कनोवेतिकैयटः आकिनजिति दीर्घत्वस्य षष्ठाध्यायगतत्वेन किनिनवास्तु अकारोच्चारणसामर्थ्यादिस्य
निलोपाऽप्रवृत्तस्यासवर्णदीर्घत्वेनसिद्धिरितिहरदत्तः एकाकी त्वेकपककः नत्वेकशब्दः संख्यापरः असत्
हायइतिततनाभिधेयनिर्देशः किंतुप्रकृत्यर्थविशेषणं तेनाऽविद्यमानतुल्यत्वान्नात्पैकार्यसहाया
र्थवाचकादेकशब्दात्प्रत्ययोनत्वेकमाकाशमित्यादौ तथाच एकाकिनावेकाकिनइतिद्वित्वबहु
त्वयोःप्रत्ययोनस्मात् एकशब्दस्यतयोरप्रवृत्तेः अत्रवार्तिकं द्विबहुभ्यां शब्दयोरसहायवाचस्यवापकश
ब्दस्यादेशोवक्तव्यः अस्तुवाऽसहायग्रहणमपिकर्तव्यं भाष्यकारात्त्वेकशब्दस्याऽसहायोप्यर्थइत्युक्तं
मत्वेत्यम [illegible] न अतः सूत्रभेदोनाश्रयणीयइत्याहुः भूतपूर्वेचरट् आढ्योभूतपूर्वआढ्यचरः नवानेभूतचरी

निपातनि...तिवः नञ्चोष्टानञ जितस्वरमेतनत्त्वरणीयं अत्र त्यभूतपूर्वं प्रदत्त्यागलाद्यवादितिचेत्सत्यं अत्र
पाठसामर्थ्यात्सामान्यविशेषन्यायेनप्रसक्तोगोष्टशाद्यातवसाचवटोवाधेनभवतीत्याहुः षष्ठ्यातृप्यच षष्ठ
ताद्भूतपूर्वेर्थे रूप्यचवटौस्तः कृष्णस्यभूतपूर्वागौः कृष्णरूप्यः कृष्णचरः अतीतेयत्कृष्णनिरूपितस्वत्वंतदाश्र
यइत्यर्थः नचपूर्वसूत्रेभूतपूर्वइत्यस्यप्रकृतिविशेषणत्वादत्रनस्यप्रत्ययार्थत्वंकथमितिवाच्यं षष्ठ्यन्तार्थ
स्यगवादिविशेषणत्वात्तस्यथातिमस्य संबंधिनः प्राधान्यात्तद्विशेषणतायायपवक्तत्वात् ॥ इतिश्रीसि
द्धांतसुधानिधौपंचमस्याध्यायस्यतृतीयेपादेप्रथममाह्निकम्
ऐंअतिशायनेतमविष्ठनौ ॥ अतिपूर्वःशेतिरभिभवार्थःसकर्मकश्च सूतेोल्युटिनिपातनाद्दीर्घोनतस्योत्रः ते
नलोकेपिप्रयोगः निपातनानामवाधक तयाकृत्स्नोपिसाधुः नचद्याप्प्रातिपदिकाधिकारात्तस्यातिशये
प्रत्ययःस्यात् तत्त्वाउपपन्नं शब्दस्याभिधेयप्रतिगुणत्वात्तोपकारानपेक्षत्वात् सत्यं अनुपपन्नातदर्थो
त्कर्षप्रत्ययोत्पत्तेः उच्चतरोनीचतरः शब्दइत्यादौतच्छब्दस्यप्राधान्यान्नउपपत्तेः नचशुक्लतरःपटइत्यादौय
थागुणस्यापिप्रकर्षएवंशब्दस्यापीयतामितिवाच्यंशुक्लादीनांद्रव्यसमवेतत्वात् गुणःकृतामसंस्कारइ
तिन्यायेनस्वप्रकर्षद्वारकस्वाश्रयप्रकर्षपर्यवसानेपिशब्दस्यार्थसमवायाभावेनशब्दप्रकर्षादर्थप्रक
र्षानुपपत्तेः वाच्यवाचकभावस्यश्वादिरूपस्यउत्कर्षापकर्षविरहात् शुक्लादौतुशुक्लत्वव्याप्यावैजात्य
सत्वात् तथाचइदंतदकितिसर्वनामपरामर्शयोग्यंयत्तद्द्रव्यं तच्चद्रव्यजातिगुणक्रियारूपंप्रातिपदि
कार्थः तत्प्रकर्षेआतिशायनिकप्रत्ययाः इतिफलितं अतिशायश्चनप्रत्ययार्थः प्राधान्यापत्त्यालघ्वीरति
शयोलघुतममित्यापत्तेोलघुतमस्तुलइत्यादेरसिद्धेः नापिप्रकृत्यर्थः अतिशयार्थकशब्दप्रकृतिकत्वनिय
मप्रसंगात् प्रकर्षातिशयार्थकेभ्यएवतदापत्तेोपटतमइत्यादेरनुपपत्तेः किंतुप्रकृतेरर्थविशेषणं अति
शयविशिष्टेर्थेवर्तमानात्स्वार्थेतमवादयः स्युरितीतिवाक्यार्थः द्वयोर्मध्येएकस्यातिशायविवक्षायांतर

वीयसुनोर्वर्ण्यमानत्वात् तथाच इदंतदिति बहूनांतेषामेकस्यनिर्द्धारणेतत्रतमबिष्ठनौप्रवर्त्तेते अयमेषामा
तिशायेनआढ्यः आढ्यतमः लघुतमः लघिष्ठः अत्रेदवक्तव्यमवादि तद्धितांतत्वात्प्रातिपदिकसंज्ञायांसत्यां यास्तयो
धातुप्रातिपदिकयोरितिसुपोलुक् यद्यपिआढ्यप्रातिपदिकस्यप्रकर्षइतियथाश्रुतभाष्यस्वरसादिस्वरस्यात्प्रा
तिपदिकात्तद्धितोत्पत्तिरितिप्रतिभाति तथापि सर्वतोदेवसेनियच्छकृतः प्रियतत्वतादिष्टनतनः प्रवर्त्तेते
सोविभक्त्यन्तइतिभाष्यात् युकालतनेष्विति सप्तम्यामलुग्विधानाच्च निरूपितंचैवेदं विभाषासूत्रेभाष्येणनिरू
त्रे अत्रेदंतत्वं सुब्विशेष्यत्वेनविवक्षितार्थानमवादिः शुक्लतरंरूपमित्यादावपिरूपस्यविशेष्यत्वेनएव
शुक्लात्प्रत्ययोत्पत्तेः एतेद्विनस्वरूपमात्रेणाशुक्लइतिव्यपदेशः अशुक्लेप्यापत्तेः नाप्यशुक्लइति शुक्लेप्या
पत्तेः किंतुशुक्लगुणयोगेन यंवस्तुनोः प्रकृष्टस्यापदस्यस्वगतप्रकर्षद्वाराप्रकर्षव्यपदेशोपिगुणएवनिमि
त्ते तदुक्तं द्रव्यस्याव्यपदेश्यस्ययउपादीयतेगुणः भेदकोव्यपदेशायतत्प्रकर्षोभिधीयते अरूपमवद्रव्यस्यावह:
प्रमाख्यायतेयथा अप्रकर्षप्रकर्षेणगुणमाख्यायतेतथा धर्मिपरमशुक्लादिपदस्यलेधर्मिणिगुणोत्त
रसद्भावेप्यन्तरंगत्वात्प्रवृत्तिनिमित्तगुणप्रकर्षाश्रयएवप्रत्ययः तथाच प्रकृत्यर्थतावच्छेदकेउत्कर्षान्वयः
नन्वेवंशुक्लतरंरूपमितिनस्यात् गुणमात्रप्रकृत्यर्थत्वात्तत्रचजातेरेव प्रकृत्यर्थतावच्छेदकत्वात्तत्रचोत्क
र्षानन्वयात् अन्यथाहस्तितरइत्यादेरपिप्रसंगात् सत्यं गोतरः गोतरायमस्मतरइत्यादेरिष्टत्वात् अपियेषु
सहचरितानांलोकप्रसिद्धानांगुणानामेवतत्रप्रकर्षान्वयात् गुणसमुदायवाचकानांगवादिपदानांगुण
वाचकत्वस्यापि सत्वाद्गुणानामपिप्रकृत्यर्थत्वानपायात् हस्तितरादौत्वनभिधानादेवानतिप्रसंगात् एते
नतांप्रत्ययान्तंसिद्धंनमांकेवलइति नैयायिकव्याख्यानम् नन्वशीतलादिकमेकं नानावा नाद्यः भेदनिबंधनस्यप्र
कर्षस्यानुपपत्तेः नांत्यः शुक्लापेक्षयैवकृष्णस्यापेतस्यापिप्रकर्षस्यविवक्षायांशुक्लादिपदात्प्रत्ययापत्तेः
सत्यं आधेयत्वेनतदासंवलनरूपप्रकर्षांगीकारात् अन्येपिप्रकर्षस्यसजातीयविषयकत्वान्नविजातीयापेक्ष

पं. ७
सि. सं.
५५
55

प्रकृ...दि...तिप्रसंगात् सजातीयगुणान्तरनिबंधनप्रकर्षविवक्षायां तिष्ठत्वात् आभ्यामिष्टप्रयोगा
णां श्रेयान् उज्ज्वलतरोऽयं कृष्णाच्छुक्ला इति जात्यंतरप्रकृत्यर्थेनावच्छेदकधर्मेणावोध्य नन्वसर्षपान्मही
यान्हिमवानिति वारणाय प्रकृष्टं विप्रकर्ष इति वाच्यमिति चेन्न प्रकृष्टान्नरूपयोर्देवलोके स्पर्द्धादर्शनात् नि
कृष्टमात्रयत्नसाधननिकृष्टयत्नयोस्तत्स्वभावात् पाचकतम इत्यादौ प्रकृष्टनिनिमित्तभूतायाः क्रियाया एव प्रक
र्षे प्रत्ययः जातेस्तु न प्रकर्षः यावद्व्यक्ति तुल्यवृत्तित्वात् संख्यायाश्चापि परिच्छेदकत्वस्वरूपत्वाद्द्रव्ये
वबहुतरो इत्यादौ एवमुन्मानप्रमाणपरिमाणानामपि प्रकर्षाभावः पटुरूपवान्पटुरासीत् इत्तमश्रे
ष्ठम इत्यादौ तु पादिभेदाद्भेदोपचारः स्यादेतत् इष्टसमर्थविभक्तिर्द्वितीया प्रथमा वा नाद्यः स्तुत्ल प्र
तियोगिकस्तुत्यां न रह्ति अतिशायप्रतियोगिनः प्रकृति त्रैकालीमनिशेने इति कालीशान्त्यस्य योग्यत्वो
कालिकतर इत्यापत्तेः कालतर इत्यस्य चेष्यमाणत्वात् पूर्वकालेनेरत्यत्र कालतरेत्यस्य प्रसंगात् गार्ग्य
स्यातिशयाश्रयत्वे गर्गाणां चावधित्वे तेभ्यः प्रत्ययापत्त्या गर्गतर इत्यस्य स्वैव परीत्येगापितरा इत्यस्य चा
पत्तेः नान्त्यः अतिशयाश्रयात् स्वार्थे प्रत्यये तन्त्यो कृतदोषाभावेपि क्रमादितराकिषेऽवितरेत्यत्र वयसः
प्रकृत्यर्थान्तर्भावेद्वयसि प्रथम इति चापत्तेः ॥ द्विवचनविभज्योपपदे तरबीयसुनौ द्वयोरेकस्यातिशा
यनिर्द्धारणाये चोपपदे सति ॥ ताभ्यामपवादः तमबिष्ठनोरपवादः उपोच्चारितं पदमुपपदं प्राग्विभा
षिकस्येत्यमात्रविषयकत्वात् तस्य लोके प्रयोगेपि प्रकृत्युपयोगो न नियतः उपपदप्रत्यययोरयथासंख्येन भ
वति व्याख्यानात् अनयोरयं लघुतरो लघीयान्वा उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसो वा पचतितरां
पचतितमां इत्यत्र तिङन्तानुभवा तिङ्गावचनादिति नियमस्य वक्ष्यमाणत्वात् ननु द्विवचनान्निर्भक्त
व्ये च निर्द्धारणे उपपदे तत्कर्मधारयः द्विवचनान्ते विभज्ये चोपपदे सतीत्यर्थः विभज्येत्यत्र ल्यबन्तत्वाभ्रमा
तिप्राप्ते निपातयत् तेन विभाज्यमित्यसाधु विभज्यशब्दस्तु स्वार्थिकण्यन्तात् यतीत्यन्यदेतत् तथा च २

दैनौष्ठस्य दंतोः स्निग्धतराः पाणिपादस्य पादौ सुकुमारतरौ अस्माकं देवदत्तस्य च देवदत्तोऽभिरूपतर
इति न स्यात् यदि तद्धितार्थोपपदे इति सूत्र्यते एवंच सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्य
त्राप्यनेन सिद्धो विभज्यग्रहणं न कर्तव्यमिति लाघवमपीष्यते तर्हि सांकाश्यकानां पाटलिपुत्र
कानां च पाटलिपुत्रका अभिरूपतमा इत्यत्रापि तरप एव प्रसंगात् यदर्थेनावच्छेदकद्वयस्यात्रापि
सत्वात् विभज्योपपदे तु सांकाश्यकेभ्यश्च पाटलिपुत्रकेभ्यश्च माथुरा अभिरूपतरा इत्यत्र तरपोऽसि
द्धेश्च मैवं उच्यते अनेनेति करणे ल्युडन्तेन वचनग्रहणेन द्वयोरिति कर्मषष्ठ्यन्तेन समासात् द्व्यर्थद्वयवाच
कपदत्वेन पारिभाषिकद्विवचनस्यात्रानुपादानात् अयमनयोरिवाभ्यर्हितो भीम्यट्टतरश्श्रेयम इति
न स्यात् आश्रयप्रतियोगिनोर्भेदाभावात् तेन तरबवीयसुनौरेकदेव्यंस्योत्कर्षायकर्षयोरूपसं
ख्यानं कर्तव्यमिति चेत् मैवं सिद्धन्त्वगुणप्रधानत्वात् तेन तरबवौ अत्येपवासिसिद्धेहम्रत्यादौ गुणे
नद्योगस्यादेकस्यापि भेदव्यवहारदर्शनात् "अजादी गुणवचनादेव" एवकारश्छन्दोनियमलाभार्थः
इष्ठनीयसुनौ गुणवचनादेवस्तां नेह पाचकतरः पाचकतमः "तुश्छन्दसि" त्वन्तात् छन्दसि इष्ठनीयसु
नौ स्तः अतिशायनेन कर्त्रीकोऽष्ठः तरिष्ठेमेयस्त्व इति टिलोपः दोहीयसी धेनुः प्रत्ययान्ताभावेऽप्युवत्त्वावः
उपाधिसंकरस्तु न भवति इष्ठवं नियमेन व्यावर्तनेनयोः प्रतिप्रसवमात्रार्थत्वात् ॥ प्रथमस्य सप्तः ॥ अना
द्योः परयोः नच प्रकृतेर्हलादित्वाद्ध्रक्ष प्रत्ययानुपपत्तिः अतएवादसामर्थ्यादेव तत्सिद्धेः एवमुत्तरत्राप्य
वधेयं अजादी इति तयोर्यथापि इष्ठवत्प्रथमान्ते तयापि अत्रार्थवशात् सप्तमीत्वं कल्प्यते अतिशायनप्रशस्यः
श्रेष्ठः श्रेयान् प्रकृत्यैकाजिति प्रकृतिभावः ज्य च ज्येष्ठः ज्यायान् ज्यादादीयस इतीकारस्यात्वम्
योमनिन्नोपायमुमव्यनित्यामार्थं वृद्धस्य च ज्यायानस्यार्थम् वृद्धस्य च ज्यादेशः स्यादजाद्योः इष्ठेन

पं॰ ...प्रकरणे दि[illegible] निरूप[illegible]
सि॰ स्य फेनमालायां कृत्वइस्यानेकस्य ग्रहणं व्याख्यानात्॥ अन्तिकबाढयोर्नेदसाधौ॥ स्थानिनोर्यथासंख्येनं तन्निमि
५६ त्तयोः। नेदीयान् नेदिष्ठः साधीयान् साधिष्ठः॥ युवाल्पयोः कनन्यतरस्याम्॥ युवेति स्वरूपस्य ग्रहणं न तु यु
वशब्दपर्यायान्तस्य तत्र प्रकर्षो न त्वयात् कनीयान् कनिष्ठः अतिशायनेन युवाऽल्पो वा पक्षे यवीयान् यविष्ठः
56 स्थूलदूरेत्यादिना यणादिलोपो गुणश्च ततोऽवादेशः अल्पिष्ठः अल्पीयान्॥ विन्मतोर्लुक्॥ अजाद्योः परतः
मतुब्भाद्ववर्णान्मत्वर्थीयस्य विनेर्ग्रहणं न त्वीणादिकस्य अतिशायनेन स्रग्वी स्रजिष्ठः स्रजीयान् त्वचिष्ठः
त्वचीयान् विन्मतोर्लुकि अजादित्वेन भसंज्ञत्वात् पदकार्यस्य कुत्वस्य न प्रवृत्तिः॥ प्रशंसायां रूपप्॥ सुबन्ता
तिङन्ताच्च प्रशस्तः पटुः पटुरूपः पचतिरूपं प्रशस्तं पचतीत्यर्थः स्यादेतत् प्रशंसायां विधेयप्रत्ययान्त्वय
स्याभ्यर्हितत्वात्तत्पर्यायार्थतायां व्याप्यत्वात्पटोः प्रशंसा पटुरूपेत्येव स्यात् न तु विशेष्यलिङ्गत्वञ्च एवं पटुरू
पो देवदत्त इति सामानाधिकरण्यं न स्यात् अभेदस्य बाधितत्वात् केचित्तु अभेदारोपेण सामानाधिकरण्य
मुपपन्नं अत एव भाष्यकृता नाये दोषवद्भाविनः इत्याहुः मैवं प्रकृत्यर्थविशेषणपक्षस्वीकारात्
पटुः पटोः प्राशस्त्यविशिष्टार्थबोधकत्वात् प्रत्ययस्य स्वार्थिकत्वात् अथ रूपदन्ताद्रूपपचतीति रूपमित्या
दौ प्रकृतिकस्तिङन्तरूपवन्न च द्विवचनादीनामश्रवणापत्तेः च भावो वक्तव्य इति चेन्न क्रियाप्राधान्यादाख्या
तस्य तस्याश्च निष्ठन्नभेदाया एव ततः प्रतीतेर्हि बहुवचनानुत्पत्तेः पचत इत्यादौ द्वित्वादीनां कर्त्रादिसाधन
ष्ठत्वात् न चात्रापि तद्वदेव प्रसङ्गः तिङन्तेन प्रागुक्तत्वात् नचैवमेकवचनस्याप्यनुपपत्तिः एकवचन
मुत्सर्गः इति प्रागुक्तत्वात् केवलप्रत्ययस्य च प्रयोगानर्हत्वात् यावः परश्चेत्यत्रोक्तत्वात् नपुंसकस्यापि लिङ्ग
सर्वनामत्वादेव सिद्धेः वृषलादिभ्य उपसंख्यानं वृषलरूपः दस्युरूपः प्रशंसायां निकृष्टानन्वयादारंभः गे॰
सिद्धे तु प्रकृत्यर्थवैस्पष्ट्यो वचनात् वृषलरूपोऽयं य आम्यं पलाण्डुना सुरां पिबेत् चोररूपो य मध्यं [illegible] न हरेत् ५६

येत इस्यबृपोयमप्यर्थं यावतीलोहितं पिबेत् निषिद्धमदनगुणमहरणादिभिर्हि षलत्वादेविस्यंभूप्रती
तेः अत्र गार्ह्यायामपि प्राहुः कर्मप्रवचनीयसंज्ञः नन्विह व्यापारातिशायस्य प्रशंसाप्रयोजकत्वात्तद्गुणा
वसिद्धिरिति चेत्सत्यं निंदाविवक्षायामनिर्वाहात् विवक्षावशादेकस्यैव कदाचित्स्तुतेः कदाचिच्च निंदा
यापर्यवसानात् गात्रसादोपि प्रतोपकषानिशायस्यापि हेरण्यस्य च समभिव्याहारविषयाभ्यनुज्ञानिपन्नैः ई
षदसमाप्तौ कल्पदेश्यदेशीयरः अत्रापि प्रकृत्यर्थविशेषणमीषदसमाप्तिः न तु प्रत्ययार्थः पैदावु
समाप्तिरिति तत्राधान्येनेतरविशेषकत्वयोगियमापन्नैः ईषदसमाप्तिविशिष्टार्थवृत्तेः प्रातिपदिकात्स्वार्थे
कल्पबादयः स्युः नन्वेवमपि पटुकल्पेत्यादिष्वप्यवचनप्रकृतिकप्रत्ययान्तेषु विशेष्यलिंगसिद्धावपि
पिनियतलिंगकप्रकृत्युन्नवकल्पबादिष्वलिं ईषदसमाप्तौ गुडइत्यर्थे गुडकल्पा द्राक्षेत्यादिकं न स्या
त् प्रकृतिलिंगप्रसंगात् इवार्थमभ्यन्तरीकृत्य साधमित्यभेदसंबंधेनापवित्यक्तस्वलिंगसंख्यानुम
वगुडादिपदानां द्राक्षादिवृत्तित्वान्न हि लिंगानुपादायित्वात् मैवं गावः स्त्रियामित्यत्र स्त्रीग्रहणेन स्वार्थिका
नां क्वचिल्लिंगवचनातिवृत्तेर्ज्ञापितत्वात् अन्यथा कर्मव्यतिहारे णच् स्त्रियामिति स्त्रियां णचो विधानान्नेद
त स्वार्थे विहितस्याञोपि स्त्रीलिंगोपपन्नेरभिधेयो स्त्रीग्रहणं वैयर्थ्यात् अत्र येन माधुर्यादिना गुणेन गुडा
दिशब्दानां द्राक्षादौ वृत्तिस्तस्य ईषदसमाप्त्या गुडदेशीषदसमाप्तिव्यवहारः वार्त्तिककारस्त्वाह सिद्धं तु
तत्त्वं वद्व्यन्नस्य पदार्थे प्रत्ययवचनादिति यद्यप्युपन्यस्तपदशब्दः समासचरमावयवे रूढस्तथापि प्रत्यय
सप्रकृत्युपन्यस्तत्वात् प्रत्ययः तथा च ईषदसमाप्तिविशिष्टेभ्यो गुडादिभ्य उपमेये द्राक्षादौ प्रत्यय इत्यर्थः
गुडइवेयं द्राक्षा ईषदसमाप्तौ गुडकल्पा द्राक्षा बहुगुडो द्राक्षेत्यादेरसिद्धावपि पूर्वोक्तदोषपरिहा
र... मीमांसकैः पटः अत्र इवेति फलितार्थविवरणमात्रं न तु प्रत्ययार्थनिर्देशः ईषदसमाप्ति

सि.
५२
57

...नपवसिद्धेः तथाहि ईषत्त्वं तद्व्यधिकरणधर्मसामानाधिकरण्याभावः तस्य प्रकृत्यर्थे स्वत्वतादा
त्म्यरूपायां समाप्तौ तस्याः स्वाभावेत्यर्थः तथा च गुरुत्वव्यधिकरणधर्मसामानाधिकरण्याभावविशिष्टय
गुडतादात्म्यतदभाववती द्राक्षेति बोधः विशेषणाभावप्रयुक्तविशिष्टाभावमात्रस्य विवक्षितत्वान्न
घाषापत्तावुक्तप्रयोगः प्रतियोगिप्रसिद्धिर्गुडादावेव प्रकृत्यर्थे यद्वा अभाव एव प्रत्ययार्थस्तस्यान्वयः तत्र गुड
त्वव्यधिकरणधर्मसामानाधिकरण्यं तथा च गुडप्रतियोगिकतादात्म्यस्य गुडत्वसामानाधिकरण्य
धर्मसामानाधिकरण्यवान् योऽभावस्तद्वतीत्यर्थः अत एवात्यन्तसादृश्य एवोक्तप्रयोग इति संगच्छते
न च रूपकस्थले वक्तुरस्यैवाभेदेन ज्ञातात्तयोस्तु बहुत्वं प्रत्ययास्तु तात्पर्यग्राहक इति वाच्यं गुडो द्राक्षेति बो
धाद्रसगुडो द्राक्षेति बोधस्यैव लक्षणयात् नन्वनिर्वृत्तस्यैवार्थसमाप्तिरसमाप्तिर्वा ज्ञायते पटुकल्पोऽसत्या
दौ गुणपटुकल्पावित्यादौ द्रव्याणि च न विशिष्य निर्वृत्तानि कृष्यदेवपाटवश्यतामाधुर्यगुणद्राक्षायां गु
डमदप्रयोगाऽऽसत्यपरिज्ञानात् देशाभेदेन गुडभेदात् किं गुडापेक्षा ईषदसमाप्तिरित्यनवधारणाच्च नच
कृतकल्पमित्यादि क्रियाशब्दमेवोदाहरणमिति वाच्यं भूतार्थे निष्ठाविधानात् क्रियासमाप्तौ क्रियाया
ईषदसमाप्तत्वानुपपत्तेः मैवं वर्तमानेऽपि क्तविधानात् क्रियैकदेशस्य भूतत्वविवक्षासंभवाच्च एकदेशा
करणाकरणाभ्यां कृताकृतमित्यादिप्रयोगात् एतेन पचतिकल्पं पचतिकल्पमपाटीत्कल्पमित्यादि
व्याख्यातं गुणद्रव्ययोरपि लोकव्यवहारेण निर्वृत्तत्वात् विभाषासुपो बहुच्पुरस्तात्तु ईषदसमाप्ति
विशिष्टार्थवृत्तेः सर्वनाम्नोऽकच्प्राक् स्यात् न च प्रकृतेः प्रागेव ईषदसमाप्तः पटुर्बहुपटुः एतेन पटुकल्प इत्यादि
सपरिजिघत्यप्रविधेयोपचर्यते सर्वत्वविधौ तत्तदेवकृत्तेः सप्तम्यन्तेन व्याख्येयं षष्ठ्यन्तमर्थप्रत्ययेनेत्युक्तेः एतेन
प्रागशस्तात्पकर्षो निरस्तः सन्निहितादुक्तेनेत्यर्थाग्रहत्वात् ब्रवीति तस्सर्वनाम्नस्तस्मादिति व्याख्यानं तत्र सर्वनं

प्रकृतित्वेनाश्रितेष्विति ल्यप् लोपनिर्बंधनाय पंचमीति हरदत्तः वस्तुतः प्रत्ययविधावपि षष्ठ्यन्तमस्तु गा
पोष्टगित्यादिवदिति तत्त्वम् न तु महाविभाषया वाक्यस्य वचनसामर्थ्याद्विकल्पवादी नास्तु मात्रा विषयके
ण बहुवाधापत्तेः अप्यहम् पर इतिव्यर्थे प्रियकृत्सनादिषु ततः प्रवर्तते सो विभक्त्यन्त इति न्यायेन गतार्थता
त् न च प्रकृत्या द्वाभ्यामन्वयव्यतिरेकाभ्यामर्थवत्त्वकल्पनात् प्रातिपदिकमात्रस्यापि स्वार्थादिपंचके
वृत्तिसंभवात् ततोऽपि प्रत्ययापत्तिरिति वाच्यं इष्टापत्तेः नैवं बहुसेवावित्यादौ सामान्यदोषादिति सत्त्व नि
षेधो न स्यादिति वाच्यं बहुकस्येति निषेधारंभात् न चैवं तत्स्ववंतान्नेकत्यत्तिपत्तेपि पदीनत्व प्रयुक्त
कुलादिवारणाय बहुत्वपूर्वस्य लमनालंभपदादिविधौ प्रत्ययलक्षणमिति नियमस्य क्रियेयत्वात्
अत एव क्यच् विधावपिनः क इत्यस्य विध्यर्थत्वमाश्रित्य स्वप इति प्रत्याख्यातं न च तिङन्त व्याहृत्यर्थं
स्यात् प्रातिपदिकादित्यधिकारेणैव सिद्धेः न विकल्पवादस्यापि तिङंतादपि भवंतीति ज्ञापनार्थं तिङश्चेत्य
त्रहत्स्यैव सिद्धेः मैवं इह तिङ्ग्रहणं निर्वेस्पष्टताख्यत्वात् अकान्नियोगेतदग्रहणेनावश्यकत्वात् न त्वेवं बहुः
पटव इत्यत्र जसंतस्य बहुत्वप्रकृतित्वात् जसकारान्तस्योदात्तत्वं स्यात् न चेष्टापत्तिः डकाराकारस्यैवोदात्त
तायाः इष्टत्वात् प्रातिपदिकस्य न तत्प्रकृतित्वं तत्रेव तदुपपत्तिः स्पष्टैतिचेत् सत्यं बहुग्निशिष्टस्य प्रातिपदि
कसंज्ञायां पटुशब्दप्रकृतिकस्य जसो लोपे सति बहुपटुशब्दात् सिच तदुपपत्तेरित्यस्यार्थवदादिसूत्रे
प्रपंचितत्वात् अथ तत्कारो व्यर्थः न च तस्यैवकारार्थतया प्रागेवेति नियमः अन्यथा महाविभाषया प्रत्य
यवत्पूर्वत्वस्यापि विकल्पापत्तेरिति वाच्यं बहुवो विधेयतया प्राधान्यात्तेन सहैव विभाषासंबंधः तस्य
परत्वव्यावृत्तेरेव सुबंतसमादित्यनेन विधानात् गुणभूतेन त्र विभाषानन्वयात् तदुक्तं गुणानां च परार्थत्वाद
संबंधः समत्वात्स्यादिति सत्यं प्रत्ययोत्पत्तेः पूर्वं प्रकृतेर्या हि शालिंगवचनं वा न तद् भवतीति तेन बहुगुडो
... तरणंतव इत्यादि सिद्धं न च स्वार्थिकानां प्रकृतितोऽपि लिंगवचनानि तस्यैव गतार्थत्वर

पं [illegible] ...माग्री विहितानां स्वार्थिकानां अभिधेयवदेव लिंगवचनमित्यस्य तत्राप्यत्वात् तेन गुरुक
सि.प्र [illegible] ल्पा इत्यादि सिद्धं हृत्रो बहुगुग्रहणादेति स्त्रीलिंगपाठस्तु प्रामादिक इति हरदत्तः ईषदसमाप्तिप्र
५८।१२ कर्षयोर्युगपद्विवक्षायां तमादिभ्यः परत्वात्कल्पबादयः तेन पटुकल्पतरमित्यादि प्रचसमकल्पति
न्यायः कल्पबादिभिर्द्योतितस्य प्रकर्षस्य योगेन तमायन्तरबादीनां पुनः प्रसंगविरहात् नचेषदसमा
प्तेरेवोत्कर्षप्रतीतिः स्यात् ननु प्रकृत्यर्थस्येति वाच्यं सामर्थ्यात्तत्सिद्धेः असमाप्तिप्रकर्षस्यासमाप्ति
रूपत्वादीषदर्थानन्वयित्वात् प्रकारवचने जातीयर् पटुप्रकारः पटुजातीयः पाल्प्रकारमात्रे यत्ततद
तीति विशेषः प्रागिवात्कः इवे प्रतिकृताविन्यतः प्राक्कप्रत्ययोऽधिकृतो बोध्यः स्वतिङन्तादपि कप्र
संगः स्वपइत्यत्र वृत्तेः अव्ययसर्वनाम्नामकच्प्राक्टेः मंडूकप्लुत्या तिङश्चेत्यस्याप्युत्तरत्रानुवृत्तेः उक्तवि
षय एव अव्ययेभ्यः सर्वनामभ्यश्च अकच् स च टेः पूर्वमित्यपिकारः ननु सर्वनेपाहृसंज्ञेन दपूर्वते सर्वत्व
प्रातिपदिके वा विवक्षितं सच इत्यस्य ह्याद्वा प्रातिपदिकादित्यस्य च प्रकृतत्वात् नायं युष्मकाभिरस्मका
भिरित्यादौ भिस्योसिस्त्वप्रविरोधः नान्यः त्वयकामयकेत्यादेरसिद्धेः मैवं सर्वनस्यटेरित्येव वाच्य
त्वात् नचोक्तदोषः अनोकारसकारभकारादावितिवाच्यत्वात् उकारसकारभकारादेस्त्वषिस्त
र्वनाम्नष्टेः प्राक् अन्यत्र तु सर्वनस्येति तदर्थः युष्मकाभिरस्मकाभिः युष्मकास्वस्मकासु युवक
योरावकयोः अन्यत्र त्वयकामयका इत्यादि अपंचसंकेतोऽयुष्मद्दस्यन्मात्रविषयः भाष्योदाहरणा
प्रामाण्यात् सर्वनाम्नो न तदन्तात्प्रातिपदिकस्येव टेः प्राक् तेन सर्वकेणाहमकेन भवकेनेत्यादि
सिद्धं तूष्णीमः काम्वक्तव्यः मित्वेनान्त्यात्परः तूष्णीकामास्ते अज्ञानानायर्थो विवक्षायां तूष्णीमित्येव
शीले कोमलोपश्च वक्तव्यः शीलेत्स्वभावो नियमश्च तूष्णींशीलस्तूष्णीकः शाश्वत्कि स्वभावाद्
स्य धर्मपरत्वे नच केणाइति जास्वायात्तिः भाष्यप्रयोगानंतत्त्वार्थकविधेरनित्यत्वाद्वा नतु बह्वविप्रक

58

विवक्षितेकल्पवाद्ययोर्द्वयोरपरः एवंच सिद्धत्वेनेष्टारपि देषाभेदेन बाध्यबाधकभावस्य द्वंद्ववत्त्वात् गा
र्ग्यायणीत्यादौ स्त्रीत्वस्याभययोत्पत्त्यंगीकारात् उभाभ्यामेकार्थद्योतनेपि बाधकाभावात् अवा
तिकं प्रभृत्युक्तत्वजकत्वं उत्सर्गप्रतिषेधावक्तव्यः इति भाष्यकृतस्त्वाहुः विशेषविधेः सामान्यविधि
बाधकत्वांगीकारादित्वनदोष इत्याहुः कोविधेरल्वमादयः पूर्वविप्रतिसिद्धं अज्ञातत्वादिकेष्वक
धेश्रेयस्त्वात्स्वार्थानरमात्रविवक्षायां साववकाशयोर्युगपदर्थद्वयविवक्षायामस्वार्थकस्यप्राप्तौ पूर्वविप्रति
षेधारंभः अज्ञातः प्रकृष्टः पटुः पटुतरकः पटुतमकः कश्चिन्नकततरादय इति वक्तव्यं नत्रपरत्वात्क
स्वत्ययपवेत्यर्थः अनन्त्यंनगौताक्षादिभिकल्प्रत्ययेन तथम् एकदेशिप्रधानस्य समास इति वक्तव्यं अर्थ
पिप्पलिकार्थेकोप्राप्तनकिकाज्ञातेति अज्ञपिप्पल्याद्यर्थविवक्षायां समासोत्र एकप्रत्ययः उपपदप्र
धानस्य संज्ञायां कस्मिंश्चिदर्थे नवग्रामकं नववाह्नके समाससंज्ञायामिति संज्ञायां कस्मिंश्चिदर्थे नवग्रामकं
नववाह्नके समाससंज्ञायामिति कस्मात्कस्यत्वेनार्थकनप्रत्ययेनात्र समासेतोदात्तत्वस्यात् समासो
त्रकंनित्वाद्युदात्तत्वादिह सिद्धं कदाचिदिदं कविधेरिति वक्तव्यं तेन अज्ञातकन्यग्रोधकोऽज्ञातन्यग्रोधः
काविति च सिद्धं कस्यवदः कोताव्ययस्यद्कारीतादेशः कश्च धकित् द्विवज्ञात सर्वनामतिङश्च अकात
त्वासंभवादिह्लाद्युपादाने अधोक्त इत्यादौ ज्ञातत्वस्यासिद्धत्वात् अथाशङ्क इत्यादेश्च लब्धस्याभ्युपगमात्
यङ्लुकोः सार्वत्रिकत्वात् नृस्मादकवोप्यनवधारितत्वात् अज्ञाते कस्माद्यमश्वोऽश्वकः अश्वस्यज्ञातत्वा
त्रांविधिविशेषस्याज्ञातत्वज्ञातेति ऊत्सितोऽश्वाःश्वकः मत्ताघाकन ऊत्साया कस्याद्देतेनसंज्ञायागम्यते
सूद्रकः राधकः स्वार्थप्रारंभः अनुकंपायां अनुकंपितः पुत्रः पुत्रकः नअज्ञातकोऽनुकंपितक इमि
तस्मात् प्रकृत्यैवार्थस्योक्तत्वात् प्रकृतेरनिर्धारितार्थविशेषणत्वेनतद्विशेषद्योतनार्थस्य स्वार्थिका
धेयकाम[illegible]पदैः प्रतीतप्रत्यायनेनवस्याप्रसंगात् सैव ऊत्सितपाद्यादनुकंपायामनुकंपितशाद्यावः
स्यथमियत्वेनधर्म[illegible]

पं॰
सि॰ ५
५८

59

[illegible]त्विन्नः यद्वा स्वार्थमभिधाय शाब्दो निरपेक्षो द्रव्यमाह समवेतं समवेतस्य च वचने लिंगसं
ख्यां विभक्तिं च अभिधाय तावत्विशेषानपेक्षमाणः कृत्स्नमात्मानं प्रियकुत्सनादिषु ततः प्रवर्तते सोऽवि
भक्त्यन्तः स्वपदमानीयपरेन स्वार्थग्राह्येन कमथार्थः स्वार्थश्च जातिगुणक्रियासंबंधस्वरूपभेदादनेक
विधः गौः शुक्लः पाचको राजपुरुषो डित्थ इति निरपेक्षः स्वार्थाभिधानेऽयं गतनिमित्तान्तरानपेक्षः द्रव्या
भिधाने स्वार्थस्यापेक्षणीयत्वात् केचित्तु बाह्यसत्तानपेक्षत्वमर्थः स्वार्थादिपंचकाभिधाने बुद्धिकल्पि
तसत्ताया एवापेक्षत्वादित्याहुः द्रव्यशब्द इदंतदिति परामर्शयोग्य वस्तुपरः स्वार्थशब्दः शक्ततावच्छेद
कपरो द्रव्यशब्दश्च तदाश्रयपर इति परविवेकः जातिशब्दोपदजातो वर्तते तदारोपितस्वरूपसंसर्गो कीकृतां जाति
माहेति तदा तेषां स्वरूपं स्वार्थो जातिर्द्रव्यं यदा विशिष्टपरस्तदा जातिः स्वार्थो व्यक्तिर्द्रव्यं शुक्लादीनां गुणाग
तजातिपरत्वे स्वरूपं स्वार्थो जातिर्द्रव्यं गुणपरत्वे तु जातिः स्वार्थो गुणो द्रव्यं गुणवत्परत्वे तु गुणः स्वार्थश्चाश्र
यो द्रव्यमिति विवेकः समवेतस्य स्वार्थसंबंधिनो द्रव्यस्याभिधाने तदन्तरमिति यावत् लिंगवचनं विभक्तिं
चाहेति संबंधः विभक्तिपदं कारकपरं स्त्रीपुमान्नपुंसकमेको द्वौ बहवः कर्मकारणमित्यादौ लिंगसंख्या
कारकाणामेव स्वार्थत्वान्न द्वन्द्वनिमित्तातिरिक्तलिंगाद्यभावात्पुनस्तदभिधानं नास्ति यद्यपि शाब्दबुद्धिक
र्माणां विरम्यव्यापाराभावात्स्वार्थपंचकस्य युगपदेव प्रतीतिस्तथापि प्रक्रियानिर्वाहाय क्रमः कल्प्यते तेन
लिंगादिबोधकप्रत्ययानामंतरंगबहिरंगत्वव्यवस्था तत्र तत्राकरग्रंथेषु स्फुटीभविष्यति पूर्वं विशेषणा
ज्ञानं ततो विशिष्टज्ञानं ततो भेदसापेक्षसंख्यातो लिंगस्यांतरंगत्वात्तदभिज्ञाने ततः सजातीयापेक्षतया
तरंगत्वात्संख्यायाः कारकस्य क्रियापेक्षतया बहिरंगत्वात् क्रियाकारकयोर्विजातीयत्वात् इत्यर्थेऽवधा
संपन्नं पश्चात्कारकाभिधानम् एतावत्विशेषानभिधाय कृत्स्नं स्वार्थादिपंचकरूपमात्मानमपेक्षमाणः श
ब्दो विभक्त्यन्तस्तत्र प्रियकुत्सनादिषु प्रवर्तते तथा च उक्तिसंग्राहकग्रहणनिमित्तातिरिक्तं उत्साद्यविवक्षा।

यां कुत्सितशब्दादपि प्रत्ययः प्रकृष्टप्रकर्षेतमादिवत् नास्य सम्यक् कुत्सितत्वमिति तस्यापि तत्संभ
वात् नत्तु स्वार्थादिषु एवकाभिधानोऽन्नमेव कुत्साद्यर्थकप्रत्यय इत्यत्र किं बीजमिति चेत् सत्यं नैषां कुत्सा
दिरूढत्वात् पचकः यंडिनक इत्यादौ स्वार्थस्य प्राधान्यं गौडीवत्त्वान्नैव विशिष्टो वक्कान्ह्यियत्यादौ लिंग
स्यद्दमेवधातामित्यादौ धातमभवता जन्यक्तःखेत्तल्यक्तःखेजनकः भवतोकर्मत्वेन धातत्वारोपेणेत् कुत्सा प्र
तीतेः प्रवृत्तिनिमित्तस्य कुत्साद्युपपत्तिरस्य लेत हेव दन्नडित्यादिषु हेभ्यस्तत्स इहवर्तितधर्मात कुत्साद्यर्था
न दर्थकप्रत्ययोपपन्नेः स्पादेतत् कुत्सित इति भावनिष्ठा उतमत्यादिषु हैवकारस्माद्वक्कसमुच्चयार्थता
द्वर्तमाने क्रियैकदेशसमाश्रेविवक्षया भूते वैतिकर्मणि वा नाद्यः प्रत्ययार्थत्वागीकारे द्रव्यवाचकात्षष्ठी
प्रसंगात् कुत्साद्याधकत्वा इव नानवद्युपपन्नेश्च प्रकृतिगतलिंगाद्युपपन्नेश्च नद्वितीयः कुत्सितादिस
मानाधिकरणपदाद्यागमेऽस्य तैलकमित्यादावस्मादिभ्योपि प्रसंगात् मैवम् प्रकृत्यर्थविशेषण
त्वेदोषाभावात् कुत्सिताद्यर्थत्वेन्नेः प्रातिपदिकात्स्वार्थकाद्य इति वाक्यार्थात् अतएव समानाधिकरण
पदस्य प्रकृत्यर्थविशेषणपदस्य च कोभेद इति चेद्ब्राह्मणः आद्य कुत्साद्युपलक्षणेन अंत्येविशेषणमिर
ति कुत्साद्युपलक्षितार्थवृत्तेः शब्दाद्विधानेकुत्साद्यः पदैतस्यापन्नसिद्धेः कुत्साविशिष्टार्थवृत्तेस्तद्विधानेतु
च कुत्साभिधायिसेऽपि न विशिष्टाभिमान उपपन्नः कुत्सादयः प्रकृत्यर्थत्वसिद्धेः न तु शब्दगुणानां वै भदवि
वक्षयाश्रयस्य नापन्नेर्गुणवचनानामाश्रयतो लिंगवचनस्वीकाराच्च प्रत्ययार्थपक्षेपि न दोष इति वि
दिक्षामनिवितिकैयटः नीलीवत् अनुकम्पात् सामाद्युपायेनीतिः तस्यामनुकंपायां मनुकंपायुक्तात्कन्स्या
त् हंततेथावकः काम्यित्वलिंगानि हृन्यात्ब्रत्वमितिहृवदन्नः शउकाः ईहकि अड्ढकि पद्धंपरासंब
सिर्पतन्मस्त्रार्थमारंभः पूर्वेणप्रकृत्यर्थानुकंपायां विधानात् बह्वचो मनुष्यनाम्नष्ठज्वा ऽश्वयोगहय
स्रोविभक्त्यनस्ताग्र ~ ऊल

...एकवद्भवति लघोर्वा प्राक्तन् अनुकम्पितो देवदत्तो देविकः देवियः देविलः वक्ष्यमाणो लोपः
प्राचामजादौ द्वे उत्तरेऽपि च उपडादेश्चतुर्वर्णान्मानि पनिकादेउत्तु उवोऽनन्तरुक्तविषये चाद्यथाप्राप्ते प्राचामिति हि
जार्थं अनुकम्पित उपेन्द्रदत्तः उपडः उपकः ठादिप्रत्ययत्रये उपियः उपिलः कनिष्ठ उपेन्द्रदत्तकः जातिना
नाम्नः कच् मनुष्यनाम्न इत्यनुवर्तनम् मनुष्यनामधेयाज्जातिशब्दात्कन्स्यात् अनुकम्पानीत्योः सिंहकः
रासभकः अजिनान्तस्योत्तरपदलोपश्च अजिनान्तान्मनुष्यनाम्नोऽनुकम्पायां कन् प्रकृतेरुत्तरपदलो
पश्च अनुकम्पितो व्याघ्राजिनो व्याघ्रकः सिंहाजिनः सिंहकः ठाजादावूर्ध्वं द्वितीयादचः अत्र प्रकरणे
ठ विभ्रजादौ च प्रत्यये परे द्वितीयाज्जवधिकस्य प्रकृतिभागस्य लोपः स्यात् देविकः देवियइत्यादि चतु
र्थादच इति वक्तव्यं अनुकम्पितो बृहस्पतिदत्तः प्रजापतिदत्तो वा बृहस्पतिकः प्रजापतिकः अनजादौ
चेति वक्तव्यं अनुकम्पितो देवदत्तो देवकः लोपः पूर्वपदस्य चेति वक्तव्यं अनुकम्पितो देवदत्तः प्रजापति
दत्तो वा दत्तकः विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः देवदत्तो देवो दत्तः सत्यभामा सत्या भा
मा वा उवर्णाल्ल इलस्य चेति वक्तव्यं लइ इति लोपसंज्ञा प्राप्ता उवर्णान्तात्परस्य इलस्य लोप इत्यर्थः ग्रादेः
परस्येति इकारमात्रस्य लोपः अनुकम्पितो भानुदत्तो वसुदत्तो वा भानुलः वसुलः नउन्न चतुर्थादन
जादौ च लोपः पूर्वपदस्य च अप्रत्यये तथैव हि उवर्णाल्ल इलस्य चेति अन्यथा यथामाध्यनिकरुत्तरत्र य
स्येति चेत्यल्लोपे कृते इकस्य कार्यानादिति कादेशो न भवति सन्निपातपरिभाषाविरोधात् तथाप्यात्रापि न स्या
त् उंप नतस्सूत्रे ठग्रहणं व्यर्थं उपलक्षणं चेदं देवभाव्यादिशब्देभ्य उकारान्तेभ्य हृजत्यतो इगं तनाम्नस्य का
देशास तिलोपार्थं तथा प्यप्रसिद्धावात् नतस्सूत्रे ठग्रहणं इकादेशे कृते ज्जादित्वा देवसिद्धेः मेवं उको द्वितीय
तक विधानार्थत्वात् वायुदत्तो वायुकः पितृकः अन्यथात्र इकादेशाभावाट्जादिलक्षणो लोपो न स्यात् इति
कथ्यटः द्वितीयादचो लोपे संध्यादावद्वितीय तदादेर्लोप इति वक्तव्यं संध्यक्षरात्परस्य लोपप्राप्ते संध्यक्षर

सहितस्योत्तरभागस्य लोपविधानं अनुकंपितो लहोडः कहोडो वा लहिकः कहिकः शेवलसुपरिवि
शालवरुणार्यमादीनां तृतीयात् मनुष्यनाम्नामेषां ठाजादौ परे तृतीयादचः ऊर्द्ध्वस्य लोपः स्यात् पूर्वाप
वादः अनुकंपितः शेवलदत्तः शेवलिकः शेवलिलः वरुणादीनामकृतसंधीनामिति वक्तव्यं अनुकं
पितः सुपर्याशीः सुपरिकः संहिताकार्योत्तरे लोपे सति तु सुपर्थिकः स्यात् अंतर्वर्तिविभक्त्याश्रया
या अलहिताश्रयायाश्च अद्धिविभागाया अपि पदसंज्ञाया भसंज्ञया बाधान्यदा नत्वनिषेधनस्य जशत्व
स्याप्युपपत्तेः नैवं स्विन्नमतः स्यानिवत्त्वादिति समाहितत्वात् उकारोत्तराकारमवधीकृत्य परभाग
स्य लोपे उकाराकारस्य यस्येति लोपे ऽज्वः परस्मिन्निति स्थानिवद्भावेन भसंज्ञाया अकारांते पर्यवसाना
त् अंतर्वर्तिविभक्त्याश्रयपदसंज्ञायास्तु षकारांते विश्रामादवधिभेदेन बाध्यबाधकभावाभावात्
स्यादिषिति न हिताश्रयपदसंज्ञाया बाधेपि तत्र तिविरहात् न च न पदान्तेति स्थानिवत्त्वनिषेधः विधि
ग्राह्यस्य तत्र भावसाधनत्वात् विधेयस्य पदान्ततायामेव तन्निषेधेन च तदभावात् न चैवं अनुकंपितो वा
गाशीर्दत्तो वा गिकः इति न स्यात् द्वितीयादचः ऊर्द्ध्वस्य लोपे वागाशिक इति स्थिते यस्येति वेत्याकारलो
पस्यावः परस्मिन्निति स्थानिवद्भावे भसंज्ञाया अकारान्ते पदसंज्ञायास्तु वकारान्ते पर्यवसानात् कुत्वज
श्त्वयोः प्रवृत्त्या वागिक इत्यस्य प्रसंगात् नैवं एकादशपूर्वपदानामुत्तरपदलोपस्य वक्तव्यत्वात् अत्र
लादेशस्य स्थानिवत्त्वाभावात् सत्तद्घस्यावधिभेदाभावाद्भसंज्ञायामेव प्रवृत्तेः अत्र तद्धिताश्रयायाः
पदसंज्ञाया अपवादत्वाद्धाथान्तर्वर्तिविभक्त्याश्रयायास्त्वेकसंज्ञाधिकारात्परत्वादिति परे विशेषः न
चैवं षडिक इत्यत्राप्याप्तिः तत्र ठाजादाविति सोत्तरलोपस्य वप्रवृत्तेरोपसंख्यानिकस्याऽप्रवृत्तेः तदुक्तं षे
पूर्ष्कान्नादिवचनात्सिद्धमिति स्यादेतत् समुदायस्य संज्ञात्वादेकदेशलोपे च वह्नेः संज्ञिप्रतीतिर्न स्या
...नसमुदायानुमानेनैव संज्ञिप्रतीतिरिति वाच्यं अनुबन्धादिनस्य बोधकत्वानुपपत्तेः नैवं

रं दे
सिद्धि
५५

61

...नामकदेशानामपि शास्त्रप्रामाण्येन साधुत्वात् लोकेपि तथा दर्शनाच्च नचातिप्रसंगात्
साधकाभावात् तदुक्तं तैल्यादीनामतुनिः पञ्चोन्यछाव्यो इत्यसाधवः नह्यन्त्या व्याख्यायते शास्त्रेदेवदत्ता।
दिवत्सूतिः अल्पे अल्पं तैलं तैलकं हृस्वे हृस्वा वृक्षो वृक्षकः ननु वंशादिषु अल्पत्वहृस्वत्वयोः स
मावेशाद्धस्वन वमात्रेणासिद्धमिति चेत् सत्यं आयामविस्तारहीनेत्यशति आयामहीनविस्तीर्णेच हृस्व
इति लोके प्रयोगाद्विषय इदं सिद्धः "संज्ञायां कन्" हृस्वनिबंधनायां संज्ञायां गम्यायां कन् वंशकः वे
णुकः "कुटीशमीशुण्डाभ्यो रः" हृस्वा कुटी कुटीरः शमीरः शुण्डारः कलहेन घटद्द्वले वस्त्रेन दोर्दृढकार
ति भवभूतिः अत्र प्रत्ययसन्नियोगेन पुंवद्भावो वक्तव्यः स्वार्थिकप्रत्ययान्तत्वात्स्त्रीत्व प्रसक्तावारभः
समुदायस्यायं न तु प्रकृते विति स्त्री प्रत्ययनिवृत्त्यभावः वस्तुतः स्वार्थिकानां क्वचित्प्रकृतिलिंगानिवृत्त्या
पैव सिद्धम् "कुत्वा डुपच्" कुतूः हृस्वा कुतूः स्नेहपात्रं हृस्वा सा कुतुपः प्रमाद "कासूगोणीभ्यां ष्टरच्" कासूः शक्ति
भेदः हृस्वा सा कासूतरी गोणीतरी षित्वान्ङीष् नच स्वार्थिकानां प्रकृतिलिंगानिवृत्तिज्ञापनार्थं "वत्सोक्षा
श्वर्षभेभ्यश्च तनुत्वे" नतुत्वमत्र तनकार्श्यदेहस्य किंतु प्रवृत्तिनिमित्तस्यातंरगत्वात् तनुत्वं चात्यंत वत्सतरः
द्वितीयं वयः प्राप्त इत्यर्थः तदेव बाल्यस्याल्पत्वात् उक्षतरः तृतीयं वयः द्वितीयस्य तद्वाल्यत्वात् ऋषभतरो
ध्यैवं अश्वतरः अश्वजातीय वयोवृत्यं न त्वमश्वः अश्वत्वं अश्वायां गर्दभाडमेत्रच तदल्पत्वं, "किंयत्तदो निर्द्धार
णे द्वयोरेकस्य डतरच्" द्वयोर्मध्ये एकस्य निर्धारणे किंयत्तद्भ्यो डतरच् भवति कतरः कठः यतरः ततरः
डित्वाट्टिलोपः महाविभाषया क इत्यादि निर्द्धार्यमाणे वाचे प्रत्ययो न तु निर्धारणावधौ तेनेह न अत्र ग्रा
मेको चैत्रमैत्राविति नचेह निर्द्धारणाभावादेव न तथेति वाच्यं द्वयोरिति कर्मषष्ठ्या अपि संभवात् तथाच द्व
योरित्यस्य निर्द्धारणविभक्तित्वे तात्पर्यग्राहकमेकग्रहणमिति फलितम् अन्ये तु व्याख्यानादेव निर्द्धार
णविभक्तित्वनिश्चयादेकग्रहणं व्यर्थमित्याहुः बहूनामपि निर्द्धारणे डतमच् इष्टत्वाद्द्वयोर्ग्रहणमपि न

ध्येत्याह्नः वा बहूनां जातिपरिप्रश्ने डतमच् बहूनां मध्ये निर्द्धारणे डतमच् स्यात् कतमो भवतां कठः यतमः ततमः जातिश्च परिप्रश्नश्चेति समाहारे द्वन्द्वः जानीति सर्वेषां विशेषणं प्रश्नेति किमः एव योग्यतावलादिति विवेकः तेन तेषां पार्थ्यात् किमो नेति बोध्यं जातिपरिप्रश्नग्रहणमनर्थकं अजातिपरिप्रश्नेपि कतम इति प्रयोगात् कतमो भवतामध्यापकः सूरो देवदत्तो वेति बहुग्रहणमपि तथा द्वयोर्मध्ये निर्द्धारणे ऽपवादस्य डतरचो विधानादर्थादस्य बहुविषयकत्वसिद्धेः तदुक्तं किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थकमिति एकाच्प्रावी यथोपाधि तदुक्तं किमादीनां द्विबह्वर्थे प्रत्ययविधानादुपाध्यानर्थक्यमिति उभौ स्यातां अनयोरेकतरो मैत्रः एषामेकतमः अत्र किमो ग्रहणस्वजपि द्वयोरित्यस्य प्रत्याख्यानात् प्राचामिति अकज्जर्थं वाकस्य महाविभाषयैव सिद्धेः प्रागिवात् इतिसूत्रे समर्थप्रथमग्रहणयोरेव निवृत्तेन कृत्वात् अवक्षेपणे कन् व्याकरणकेन गर्वितः नतु कुत्सितः इत्येनेन गतार्थमेतत् न च स्वार्थमेतदिति वाच्यं तथापि तदुक्तं वमेवकश्चेति वाच्यत्वात् मैवं येनेतरः कुत्स्यते तत्र कन् यः स्वयं कुत्स्यते तत्र क इति विभागात् व्याकरणादेः स्वतो कुत्सितत्वात् प्रागिवीयाः समाप्ताः इवे प्रतिकृतौ कन् स्यात् अश्व इव प्रतिकृतिरश्वकः सदृशार्थकात्पत्तद्विधिकारीयाः प्रत्ययान्तसादृश्यमात्राणामिति चित्रमीमांसादयः सादृश्यमूलकाद्भेदोपचारादश्वशब्दवत्सम्प्रतिकृत्यर्थः प्रत्ययस्तु द्योतक इति केचित् लक्षणादिकं ते प्रतिमा रूपं प्रतिकृतिः तेन गोविवर्गादय इत्याहौ न संज्ञायां च अश्वकः उष्ट्रकः अश्वादिसादृश्य एवं संज्ञासमुदायरूपा लुम्मनुष्ये मनुष्येवाच्ये संज्ञायां विहितस्य कनो लुप्स्यात् चंचा तृणमयः पुमान् तत्सदृशो मनुष्यश्चंचा डुंसीयसेवमानानेसंसारोध्यपवगीति तं जगत्यभजन्मर्त्यश्चंचा च लुक्कलायर्थे लुब्ग्रहणं आकृतिलिंगग्रहणार्थं लुकि मनुष्यलिंगप्रसंगात [illegible]ंते मनुष्यावित्यादि तदुक्तं प्राक् हरीतक्यादिषु व्यक्तिरिति वचनं तत्र मनुष्यादिषु नाह्ववदेवेत्यर्थः [illegible]णोप्य यत जीविकार्थमविक्रीयमाणां च तत्र वाच्ये लुप्स्यात् वासुदेवः शिवः स्कंद इत्यादि

प्र

पं.
सि.इ
द.

[illegible]स्येशद्धाङ्कद्दमटेतितासांसंज्ञेयं यास्त्वायतनेषुप्रतिष्ठाप्यपूज्यंतेतत्रतन्त्रान्तरेणालक्ष
[illegible]तथानावार्तिककृता अर्चासुपूजनार्थासुचित्रकर्मध्वजेषुच इवेप्रतिकृतौलोपःकनोदेवपथादिषु अ
र्चासु शिवः विष्णुः चित्रकर्मणि अर्जुनः दुर्योधनः ध्वजेषु कपिः गरुडः सिंहः अपण्ये किं हस्तिकान्वि
क्रीणीते एतेनरामसीतालक्ष्मणजीविकार्थे विक्रीणीतेयानरस्तंचधिधिरिथक्र अस्मिन्नर्थेयेयोपशब्दान्नवे
62 न्निव्यर्थअर्जुनपाडितनंचधिधिरिथक्र इतिव्याख्यात देवपथादिभ्यश्च कनोलुप् देवपथः हंसपथः आकृति
गणोयम् 'वस्तेर्ढञ्' वस्तिरिवगौस्तेयम् वास्तेयी टिड्ढाणञिति ङीप् प्रतिकृतिग्रहणंतन्निवृत्तं 'शिलायाढः'
शिलेवशैलेयंदधि कठिनमित्यर्थः योगविभागाड्ढञपीतिकेचित् शैलेयं 'शाखादिभ्योयः' शाखेवशा
ख्यः मुख्यः जघन्यः अग्र्यः शरण्यः द्रव्यंचभव्ये द्रुशब्दादिवार्थेयत् द्रव्यमयंब्राह्मणः कुशाग्रात्छः
कुशाग्रमिवकुशाग्रीयाबुद्धिः सूक्ष्मार्थग्राहित्वरूपमिहतीक्ष्णत्वं समासाच्चतद्विषयात् इवार्थविषा
यात्समासात् इवार्थेछः स्यात् नचतत्पदप्राधान्यात् छप्रत्ययपरमितिवाच्यं अनेनैवछविधानादत्रे
वाक्यमादाद्युपपत्तेः गुणीभूतस्यापीवार्थस्यैवपरामर्षात् नचइवार्थेसमासस्यापिअन्यत्रनेविधानमिति
वाच्यं अत्रवादसामर्थ्यान्न्यायेपतिवान्नउपपत्तेः अथोरेणादेवदत्तस्यवधः काकतालीयः सचछप्रत्ययवि
षयएवतेनस्वातन्त्र्यउपाध्यन्नरयोगोविग्रहः अथवेत्याकदेश्यष्ट अजाकृपाणीयः इहकाकतालशब्दोनः
दागमनपतनयोःकाकागमनमिवतालपतनमिवकाकतालं इतिसमासार्थः पततातालफलेन
यथाकाकस्यवधस्तथोपनिपतताचोरेणदेवदत्तस्येतिछप्रत्ययार्थः इतिविवेकः विल्वकस्तुलकारको
स्तभतद्धिवर्णयोर्द्रष्टव्यः शर्कराभ्योऽण् पूर्वविषये शार्कंदेवशार्करं मधु कुशीकमिवपौण्डरीकं
मुखं अङ्गुल्यादिभ्यष्ठक् आङ्गुलीकः भारुजिकः भाकजिकः ॥ एकशालायाष्ठजन्यतरस्याम् ॥ इवार्थे
पनेठक् एकशालेवएकशालिकः ऐकशालिकः कर्कलोहिताद्दीकक् कर्कः शुक्लोऽश्वस्तद्वत्कार्कीकः

लोहित इव लौहितीकः स्फटिकः पूगाञ्ञ्योऽग्रामणीपूर्वात् इवार्थे इति निवृत्तं नानाजातीया अनियतवृत्तयो
ऽर्थकामप्रधानाः संघाः पूगाः तद्वाचिनो ञ्यः स्यात् स्वार्थे लौहितध्वज्यः अग्रामणीपूर्वात् किं देवदत्तो ग्राम
णीर्येषां ते देवदत्तकाः वक्ष्यमाणः कन् अत्र समुदायस्य पृथग्वचनत्वान्माभूत् व्रातच्फञोरस्त्रियां ञ्यः स्यात्
शरीरायासजीविनो व्राता इति प्रागुक्तं तेन न पूर्वेण गतार्थत्वं कापोतपाक्यः कौञ्जायन्यः ब्राध्नायन्यः
ऊर्जादिभ्य इति च्फञ् अस्त्रियामिति किं कौञ्जायनीत्यादौ माभूत् आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मण
राजन्यात् वाहीकेषु य आयुधजीविसंघस्तद्वाचकात्स्वार्थे ञ्यट् ब्राह्मणराजन्यसंघं वर्जयित्वा क्षौद्रक्यः
मालव्यः टित्करणं ङीबर्थं क्षौद्रकी हलस्तद्धितस्येति यलोपः आयुधेति किं मल्लाः संघेति किं सम्राट् वाही
केषु किं शबराः अब्राह्मणेति किं गोपालवाः शालङ्कायनाः ब्राह्मणविशेषस्य राजन्येत्यत्र स्वरूपस्य ग्रहणं
वृकाट्टेण्यण् उक्तविषये वार्केण्यः आयुधेति जातिशब्दनिवृत्त्यर्थः दामन्यादि त्रिगर्तषष्ठाच्छः दामन्या
दिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यश्छः त्रिगर्तः षष्ठो वर्गो येषां ते त्रिगर्तषष्ठाः तदुक्तं आहु
स्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिः इह कौण्डोपरथ
ब्रह्मगुप्तशब्दौ शिवाद्यणन्तौ अन्ये लिङ्गता इति विवेकः ब्रह्मगुप्तशब्दः शुद्ध एव न तु तद्धितान्त इति केचित्
दामनीयः औलपीयाः त्रिगर्तषष्ठाश्च यथा कौण्डोपरथीयः दाण्डकीयः क्रौष्टुकीयः जालमानीयः ब्रह्मगुप्ती
यः जानकीयः पर्श्वादियौधेयादिभ्यामणञौ उक्तविषये क्रमात्स्वार्थे स्तः पार्शवः पार्शवौ पर्शवः जन
पदार्थकात्पर्शुशब्दात्पाठे यज्ञगणेऽयम् ततोऽनेन विहितस्याप्यणस्तद्राजत्वाद्बहुत्वे लुक् नन्वेवम
स्य स्वार्थिकत्वं न स्यात् संघार्थत्वप्रसंगात् अथेतो जनपदवचनादेव पार्श्वशब्दात्स्वार्थेऽण् विधेय इति चेन्नै
वं बहुप्रत्ययवाचिनः पर्शुशब्दादेवास्याणो विधानात् बहुप्रत्ययवाचित्वे संघवाचित्वस्यार्थसिद्धतया स्वा
पदेठक्तेः नहि जनपदवाचिपर्शुशब्दात्स्वार्थेऽण् विधिः संभवति पार्शवशब्दस्य जनपदे प्रयोगाभा।

पं. [illegible] धेयाः वचनद्वयं अञंतत्वादाद्युदात्तं बहुवचने लुकि दगंतत्वादंतोदात्तमित्यादि प्राग्रुक्तं
सि. [illegible] यौधेयः अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ् आयुधेति निवृत्तं अणंतेभ्योभिजि
६३ दादिभ्यः स्वार्थे यञ् अभिजितोऽपत्यमाभिजित्यः एवं वैदभृत्यः शालावत्यः शैखावत्यः शामीवत्यः और्ण
वत्यः श्रौमत्यः अणो गोत्रे विहितस्योपादाने तेनाभिजित इत्यादौ न तत्रैणापवादः कालसाम्यदेवतेति
विहितस्य च न गोत्रमिति वक्तव्यं अयं यञ् गोत्रसंज्ञ इत्यतिदेशोऽयं तेन गोत्रवचनात् ह्विजित्यत्रास्योप
पादाने तत्र गोत्रपदस्य स्वार्थिकत्वेन गोत्राधिकारविहितस्यैव प्रत्ययस्य ग्रहणात् तेनाभिजित्यस्याप
मिति ञ्य आपत्यस्य चेति यलोपः भाष्यकृतस्त्वाहुः तत्र गोत्रपदमर्थपरमेव अन्यथोपगवकुल्यणो
नाकुञ्ज्नस्यात् अतोतिदेशो वैयर्थ्यमिति ञ्याद्यस्तद्राजाः पूगादित्यारभ्य विहिताः प्रत्ययास्तत्संज्ञाः
तेन तद्राजस्येत्यस्त्रियां बहुषु लुक लोहितध्वजाः कपोतपाकाः कौञ्जायनाः व्राह्मकाः हूकाः दामनयः
कौण्डोपरथाः पर्शवः यौधेयाः अभिजित इत्यादि स्त्रियां तु लोहितध्वज्या इत्यादि यौधेयशब्दस्य तु लोपे तो
दात्तत्वे यौधेयस्याकोलक्षणोवाधोयेयः संवोपलक्षणेत्यण् एवं अत्र दगंतानां प्रयोजनद्वयं बोध्यं
इति श्रीसिद्धांतसुधानिधौ पंचमस्याध्यायस्य तृतीयपादे द्वितीयमाह्निकं पादश्च समाप्तः ॥

श्रीः

पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च वुञन्तं स्त्रियामेव द्वौ द्वौ पादौ ददाति द्विपादिकां ददाति २
द्विशतिकां तद्धितार्थेति समासः न च वीप्सायाः प्रकृत्युपाधित्वात्कथं तद्धितार्थत्वमिति वाच्यं ध्योत्यत्वे
नैव तस्यास्तदर्थोपपत्तेः ददातिरिह समर्पणमात्रार्थः परस्वतापादनपर्यंत परत्वे तु अन्यत्र सूत्रग्रहणं निश्चसंगात्
तस्य परनिमित्तकत्वाद् दचः परस्मिन्निति स्थानिवत्त्वप्रसंगात्याहुः यदि तु पद्भावो न स्यात् सूत्रभाष्ये पाद
शतग्रहणमनर्थकमन्यत्रापि दर्शनात् द्विमोदकिकां न च द्वौ द्वौ माषौ ददातीत्यादावतिप्रसंगः अत

63

भिधानादिति कैयटः ॥ टेऽव्यवसर्गयोश्च ॥ अवीक्षार्थमिदं द्विपदिकां दंडिपति व्यवसृजति वा ॥ स्थूलादि
भ्यः प्रकारवचने कन् ॥ जातीयरोऽपवादः स्थूलप्रकारः स्थूलकः अणुकः चंचद्बृहतोरुपसंख्यानं चंच
त्कः बृहत्कः सादृश्यप्रत्ययद्योत्यं चंचतिश्चलनार्थः अचंचन्नपि यः स्यन्दमानप्रभत्वाच्चंचन्निव दृश्यते
मण्यादिः स चंचत्कः अबृहन्नपि यः प्रस्तनप्रभत्वाद्बृहन्निव दृश्यते स बृहत्कः प्रातिपदिकार्थप्रत्ययार्थ
कारकव्याप्तिरत्यंतगतिः तदभावे कन् स्यात् छिन्नकं भिन्नकं ईषच्छिन्नमित्यर्थः नवकं नाहेति वक्तव्यं
भिन्नतरकं भेदप्रकर्षोनात्यंतगत्या युगपद्विवक्षायां पूर्वविप्रतिषेधात् तरपि कृते कानत्वाभावादप्राप्ता
वारंभः इहानत्यंतगतियुक्तपदस्वार्थः अन्यथा कननात् घोननानुपपन्नैः न सामिवचने स्वामिपर्यायेऽप
पदे उक्तं न स्यात् स्वामिकृतं अर्द्धकृतं न च इहासमासपदेनात्यंतगतेः साम्यादिपदैरेवोक्तत्वादसमा
सेवक्तानत्वाभावात्साम्यादौ नांगतिकारकान्यतरत्वाभावात् कुट्टृहणमुविभाषायामपि प्रवृत्त्यभावात्
प्रसक्तिरेव नेति निषेधवैयर्थ्यमिति चेत्सत्यं अत्यंतस्वार्थिकस्यैव कनो निषेध्यत्वात् तस्य चानेनैव प्राप्य
त्वात् तेनासूत्रमभिन्नतरकं भवति बहुतरकं व्याप्यते स्तकरतरकं मन्यन इत्यादि सिद्धं बृहत्या आच्छादने
हो आवारो नरा मंगो समो बृहतिकां नथा आच्छादने किं बृहती छंदः अषडक्षाशितंगवलंकर्मालंपुरुषाध्यु
त्तरपदान्तः न विद्यते षडक्षीणि यस्मिन्सोऽषडक्षीणो मंत्रः मंत्रः स्यादषडक्षीणो यस्तृतीयाद्यगोचरः आशि
तागावीयत्रस आशितंगवीनो देशः आङ्पूर्वादश्नातेः कर्मणि क्तः आशितः कोर्तेति तापकात् एयनात्कर्म
णीवा प्रभूतत्वणमित्यर्थः अलंकर्मणोऽलंकर्मीणः एवमलंपुरुषीणो मल्लादिः अध्युत्तरपदादध्यायी
श्वराधीनः न चेहैव वाक्यपूर्वकत्वनियमात् वाक्यस्यानिष्टत्वेवत्रमभित्यमित्यादौ नित्यपदोपादानात् इह
विग्रहोऽदर्शनः महाविभाषाया निवर्तकाभावात् अत्र वार्तिके तदिदमिति सधीनप्रत्ययो वक्तव्यः मत्तावि
तस्य परनिगमनीदमायत्तमिति वाक्ये पदे राजाधीनमिति प्रत्ययः अत्र भाष्ये पंचमातिसकारस्यैतस्ता
शातग्रहणमनर्थकं नन्यथा।

पं
सि
दृ

[illegible]...यदर्थे यत्र सकारप्रश्लेषस्य लक्षणासादावति व्याख्यास्यामा द्वितीये दूषितत्वात् नत्याधिश्रुत्याधीनोभूथी
नइत्यादौ विग्रह. वक्रोऽप्रसंगाच्च एतेन प्रथीनत्प्रत्ययोपि निरस्तः पदसंज्ञाविरहे राजाधीनमित्यादौ नलोपा
नापत्तेश्च नचविग्रहापत्तिः उत्तरविभाषाग्रहणात्केषांचित्स्वार्थेकन्प्रत्ययानां नित्यत्वावगमात् तेव तमादयः
प्राक्तनः त्यादयः प्रागुक्तः आमादयः प्राग्यदः वृहतीजात्यन्ताः समासान्ताश्चेति कत्तत्र अवरदेशपणो कत्
सुपादथातेति विहितो वुन् किमेत्तिङव्ययघादिग्यामादयः वृहतीजातिपदाभ्यां वृहत्या आच्छादने जात्यन्ता।
कवेति कन्नुच्छाद्युपलक्ष्यते बहुवचनं एतत्तत्र विहितस्वस्य पाश्वार्थसंग्रहार्थं तत्रत्यप्रत्ययार्थविशेषाणां
प्रकृतिमात्रेण नववाधा तत्र समवायोऽनित्या इति भावः नन्वेवमपि अणुत्तरपदाद्याः प्रकृतेरभावात्प्रत्ययवि
ध्यनुपपत्तिः अधिनाविग्रहाभावात् मैवं राजाऽधिकृतो यस्मिंस्तद्राजाधीनमिति बहुव्रीहिस्वीकारात् अ
धिशब्दस्य ह्नोकारकविशिष्टक्रियावचनत्वात् राजादीनां विशेषणत्वविवक्षया पूर्वनिपातः राजानमधि
गतइति तत्पुरुषेऽतिवेहाद्विवदथेः पूर्वनिपातप्रसंगात् नन्तु शेषाद्विभाषेति कबापत्त्या अधेकत्तरपदत्ता
भावात्प्रत्ययोनस्यात् सत्यं अव्ययीभावस्यवाव्ययत्वात् नवाधिस्त्रीत्यादिवदथेः पूर्वनिपातापत्तिः राजदत्ता
दैपादन्यत्वात् नच विभक्त्यर्थे तत्रेदथेवव्ययीभावोऽधिकरणप्रधानो नत्वाधेयप्रधान इति कार्यादिसामा
नाधिकरण्यं यत्स्यादिति वाच्यं साहचर्यात्तदुपमन्तेः कुटीरादिवत्प्रत्ययान्तस्येष्टलिंगवचनसिद्धेः नवाये
राजदन्तादिषु पाठेऽधिस्त्रीत्यादावपि पूर्वनिपातापत्तिः आधेयेऽधिरिति विशेषपाठत्वात् तत्राधाव
द्वलित्वात् वस्तुतस्त्वधिशब्दः शौण्डादिः अधिरीश्वरे इति कर्मप्रवचनीयसंज्ञा यस्य चेश्वरवचनमिति सप्तमी
ततः समासः एवं वाक्यमपि अधिब्रह्मदत्ते पञ्चाला इतिवद्राजन्यधि राजाधीनमिति शास्त्रावधिपात्स्येशिनः
व्यपरत्वात् यद्वाऽधिकरण एव सप्तमी राजन्यधिकृतं राजाधीनमित्यस्वपदविग्रहः हेतौ समसाधनक्रिया। गं ९४
वचनस्याप्यधिशब्दस्य वाक्ये तदभावात् अथ कथमधीनो निघ्न आयत्त इत्यमरः सत्यं अत्रापरस्मिन्निति

64

